Shri Raghunath Temple MSS. Library,
JAMMU

(ख)

No. ५२८

Title काव्यप्रकाशः (मूल मात्रम्)

Author मम्मट भट्टः (अज्ञातकर्तृ)

Extent ५३ Age सं० १८८९

Subject अलङ्कार शास्त्रम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

काव्यप्रकाशः

५२८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ ह्रीं श्रीं हें सों: क्लीं ईशान्तिवज्र ह्मो हुं फट्

[illegible]

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तत्तत्वचनाविशेषस्य यन्त्यस्यार्थे लक्षणा पाशक्ता ले ग्राह्यसमयदेवप्रकार अपदत्वार्थः [illegible] तान विशेषविशिष्टव्याख्यापरस्तुतिः
प्रयत्नार्थे वस्तुतः [illegible] तथा [illegible] इति दानक [illegible] दाच्यतिः कृता ॥ अत्र तत्तु समनुभाव [illegible] विषयकरतिभावसावक्त्रनेन लक्ष्यक्रमव्यङ्ग्यस्य व्यतिरिक्तकाव्यलिङ्गयोरलङ्कारयोर्न तिरूप [illegible]
लक्ष्यक्रमव्यङ्ग्यस्य च भेदाक्षिदिदिष्य [illegible] दर्शनीयम् ॥

का॰
व॰
१

कृ नलसत्पनीति

ॐ स्वस्ति श्रीगणेशाय नमः ॥ ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत्परामृशति ॥ नियतिकृतनियमरहितां ह्लादैक
मयीमनन्यपरतन्त्राम् ॥ नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥ नियतिशक्त्या नियतरूपा सुखदुःखमोहस्वभावा परमा
ण्वाद्युपादानकर्मादिसहकारिकारणपरतन्त्रा षड्रसा न च हृद्यैव तैः ॥ तादृशी ब्रह्मणो निर्मितिर्निर्माणं एतद्विलक्षणा कविवाङ्निर्मितिः अत
एव जयति जयत्यर्थेन च नमस्कार आक्षिप्यते इति तां प्रत्यस्मि प्रणत इति लभ्यते ॥ इहाभिधेयं सप्रयोजनमित्याह ॥ काव्यं यशसेऽर्थकृते व्य
ते ४ वहारविदे शिवेतरक्षतये ॥ सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥ १ ॥ कालिदासादीनामिव यशः श्रीहर्षादेर्धावकादीनामिव
धनं राजादिगतोचिताचारपरिज्ञानं आदित्यादेर्मयूरादीनामिवानर्थनिवारणं सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वा
दनसमुद्भूतं विगलितवेद्यान्तरमानन्दं प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दा
र्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकविकर्म तत्कान्तेव सरसतापादनेनाभिमुखी
२ कृत्य रामादिवद्वर्तितव्यं न रावणादिवदित्युपदेशं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम् अस्य कारणमाह ॥ शक्तिर्निपुण
ता लोकशास्त्रकाव्याद्यवेक्षणात् ॥ काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥ ३ ॥ शक्तिः कवित्वबीजरूपः संस्कारविशेषः यां विना काव्यं न प्र
सरेत् प्रसृतं वा उपहसनीयं स्यात् लोकस्य स्थावरजङ्गमात्मकलोकवृत्तस्य शास्त्राणां छन्दोव्याकरणाभिधानकोशकलाचतुर्वर्गगजतुर
गखड्गादिलक्षणग्रन्थानां काव्यानां च महाकविसम्बन्धिनामादिग्रहणादितिहासादीनां च विमर्शनाद्व्युत्पत्तिः काव्यं कर्तुं विचारयितुं च ये जा
नन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिरिति त्रयः समुदिताः न तु व्यस्ताः तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्न तु हेत
वः ॥ एवमस्य कारणमुक्त्वा स्वरूपमाह ॥ तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ॥ दोषगुणालङ्कारा वक्ष्यन्ते क्वापीत्यनेनैतदाह यत्
सर्वत्र सालङ्कारौ क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः यथा यः कौमारहरः स एव हि वरस्ता[illegible] चैत्रक्षपास्ते चोन्मीलितमालती
सुरभयः प्रौढाः कदम्बानिलाः ॥ सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥ अत्र
स्फुटो न कश्चिदलङ्कारः रसस्य हि प्राधान्यान्नालङ्कारता ॥ तद्भेदान्क्रमेणाह ॥ इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः ॥ इद
मिति काव्यं बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः ततस्तन्मतानुसारिभिरन्यैरपि न्य
ग्भावितवाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य ॥ यथा ॥ निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो नेत्रे दूरमनञ्जने पुलकिता
तन्वी तवेयं तनुः ॥ मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥ अत्र तद
न्तिकमेव रन्तुं गतासीति प्राधान्येनाधमत्वं व्यज्यते अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ॥ अतादृशि वाच्यादनतिशायिनि ॥ यथा ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नैयायिकाः =

गुणानन्तरं शब्दार्थयोः ... तद् देवदत्तेनोक्तं ... नीत्या ... अन्विताभिधानवादिनः ... अभिहितान्वयवादिनः ... इति सूचितम् = ... मीमांसकाः = ८ ... प्रतिवदति ... तण्डुलादि ...

श्यामलक्ष्मीं तरुण्या नववञ्जुलमञ्जरीसनाथकरां । पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ॥ अत्र वञ्जुललतागृहे दत्तसंकेता नागतेति व्यङ्ग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारकारित्वात् । शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम् ॥ चित्रमिति गुणालंकारयुक्तम् । अव्यङ्ग्यमिति स्फुटप्रतीयमानव्यङ्ग्यरहितम् । अवरमधमम् । यथा ॥ स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटामूर्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः । भिद्यादुद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुमद्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥ विनिर्गतं मानदमात्ममन्दिराद्भवत्युपश्रुत्य यदृच्छयापि यम् । ससंभ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियामरावती ॥ इति राजानकमम्मटाचार्यविरचिते काव्यप्रकाशे काव्यप्रयोजनकारणस्वरूपविषयनिर्णयो नाम प्रथम उल्लासः ॥१॥ क्रमेण शब्दार्थयोः स्वरूपमाह । स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा । अत्रेति काव्ये एषां स्वरूपं वक्ष्यते । वाच्यादयस्तदर्थाः स्युः । वाच्यलक्ष्यव्यङ्ग्याः । तात्पर्यार्थोऽपि केषुचित् ॥ आकांक्षासंनिधियोग्यतावशाद्वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीत्यभिहितान्वयवादिनां मतम् । वाच्य एव वाक्यार्थ इत्यन्विताभिधानवादिनः । सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते ॥ तत्र वाच्यस्य व्यञ्जकत्वं यथा ॥ माए घरोवअरणं अज्ज हु णत्थि त्ति साहिअं तुमए । ता भण किं करणिज्जं एमेअ ण वासरो ठाइ ॥ अत्र स्वैरविहारार्थिनीति व्यज्यते ॥ लक्ष्यस्य व्यञ्जकत्वं यथा ॥ साहेन्ती सहि सुहअं खणे खणे दूमिआसि मज्झ कए । सब्भावणेहकरणिज्जसरिसअं दाव विरइअं तुमए ॥ अत्र मत्प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यम् । तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यङ्ग्यम् ॥ व्यङ्ग्यस्य व्यञ्जकत्वं यथा ॥ उअ णिच्चलणिप्पन्दा भिसिणीपत्तम्मि रेहइ बलाआ । णिम्मलमरगअभाअणपरिट्ठिआ संखसुत्ति व्व ॥ अत्र निस्पन्दत्वेनाश्वस्तत्वं तेन जनरहितत्वमतः संकेतस्थानमेतदिति कयाचित्कंचित्प्रत्युच्यते । अथवा मिथ्या वदसि न त्वमत्रागतोऽभूरिति व्यज्यते । वाचकादीनां क्रमेण स्वरूपमाह ॥ साक्षात्संकेतितं योऽर्थमभिधत्ते स वाचकः ॥ इहागृहीतसंकेतस्य शब्दस्यार्थप्रतीतेरभावात्संकेतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन संकेतो गृह्यते स तस्य वाचकः । संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा ॥ यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव तथाप्यानन्त्याद्व्यभिचाराच्च तत्र संकेतः कर्तुं न युज्यत इति गौः शुक्लश्चलो डित्थ इत्यादीनां विषयविभागो न प्राप्नोतीति तदुपाधावेव संकेतः । उपाधिश्च द्विविधः वस्तुधर्मो वक्तृयदृच्छासंनिवेशितश्च । वस्तुधर्मोऽपि द्विविधः सिद्धः साध्यश्च । सिद्धोऽपि द्विविधः पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च । आद्यो जातिः । उक्तं च वाक्यपदीये । न हि गौः स्वरूपेण गौर्नाप्यगौः गोत्वाभिसंबन्धात्तु गौरिति । द्वितीयो गुणः । शुक्लादिना हि लब्धसत्ताकं वस्तु विशिष्यते । साध्यः पूर्वापरीभूतावयवः क्रियारूपः । डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन संनिवेश्यत इति सोऽयं संज्ञारूपो यदृच्छात्मक इति । गौः शुक्लश्चलो डित्थ इत्यादौ

वैयाकरणाः स्फोटं ... शब्दं ... ॥

व

यदि ... शक्तिः ... प्राधान्यं ... जातिः ... शक्तिः ... = ५

सामान्यादि

गुणक्रियादि ... = ५

... सामान्यं ...

... = ५

अथवा ... = ५

स्वाभाविको वस्तुधर्मः = ७

... इति कथ्यते इति ... क्रियारूपः ... = ५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

का॰
प्र॰
६

चतुर्व्यपी शब्दानां प्रवृत्तिरिति महाभाष्यकारः॥ परमाणुत्वादीनां तु गुणमध्यपाठात् पारिभाषिकं गुणत्वं गुणक्रियायदृच्छानां
वस्तुत एकरूपाणामप्याश्रयभेदाद्भेद इव लक्ष्यते यथैकस्य मुखस्य खड्गमुकुरतैलाद्यालम्बनभेदात् अन्ये तु हिमपयःशङ्खाद्याश्रये
षु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्लः इत्याद्यभिन्नाभिधानप्रत्ययोत्पत्तिस्तच्छुक्लत्वादि सामान्यं गुडतण्डुल
पाकादिष्वेकमेव पाकादित्वं बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थादित्वमस्तीति सर्वेषां
शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये॥ तद्वानपोहो वा शब्दार्थः॥ कैश्चिदुक्त इति गौरवभयात्तन्नानुपयोगाच्च नेह प्रद
र्शितः॥ स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते स इति साक्षात्संकेतितः। अस्येति शब्दस्य॥ मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया॥ कर्मणि कुशल इत्यादौ दर्भग्रहणाद्ययोगात्॥ गङ्गायां घोष इत्यादौ च गङ्गायां घोषा
धिकरणत्वासंभवात् मुख्यस्यार्थस्य बाधे सति विवेचकत्वादौ सामीप्ये च संबन्धे रूढितः प्रसिद्धेः तथा गङ्गातटे इत्यादेः प्रयोगाद्ये
षां तथा न प्रतिपत्तिः तेषां पावनत्वादीनां धर्माणां तथा प्रतिपादनात्मनः प्रयोजनाच्च मुख्येनामुख्योऽर्थो लक्ष्यते यत्स आरोपितः शब्द
व्यापारः सान्तरार्थनिष्ठो लक्षणा॥ स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्॥ उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा॥ ९॥ कुन्ताः प्रविशन्ति
यष्टयः प्रविशन्तीत्यादौ कुन्तादिभिरात्मनः प्रवेशसिद्ध्यर्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते अत उपादानेनेयं लक्षणा
गौरनुबन्ध्य इत्यादौ श्रुतिचोदितमनुबन्धनं कथं मे स्यादिति जात्या व्यक्तिराक्षिप्यते न तु शब्देनोच्यते विशेषणानामिधाय छिन्नमिति न्याया
त्। विशेष्यं नाभिधा गच्छेदिति न्यायादुपादानलक्षणा तु नेहोदाहर्तव्या नह्यत्र प्रयोजनमस्ति न वा रूढिरियं व्यक्त्यविनाभावात्तु जात्या व्यक्तिरा
क्षिप्यते यथा क्रियतामित्यत्र कर्ता कुरु इत्यत्र कर्म प्रविश पिण्डीमित्यत्र गृहं भक्षयेत्यादि च पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र रात्रिभोजनं
न लक्ष्यते श्रुतार्थापत्तेरर्थापत्तेर्वा तस्य विषयत्वात् गङ्गायां घोष इत्यत्र तटस्य घोषाद्यधिकरणत्वसिद्धये गङ्गाशब्दः स्वार्थमर्प
यतीत्येवमादौ लक्षणेनैषा लक्षणा उभयरूपा चेयं शुद्धा उपचारेणामिश्रितत्वात् अनयोर्भेदयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताट
स्थ्यं तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसंप्रत्ययः गङ्गासंबन्धमात्रप्रतीतौ तु गङ्गातटे घो
ष इति मुख्यशब्दाभिधानाल्लक्षणायाः को भेदः॥ सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा॥ आरोप्यमाण आरोपविषयश्च यत्रा
नपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सारोपा॥ विषय्यन्तःकृतेऽन्यस्मिन्सा स्यात्साध्यवसानिका॥ विषयिणारोप्य
माणेनान्तःकृते निगीर्णेऽन्यस्मिन्नारोपविषये सति साध्यवसानिका भेदाविवेचनात्सादृश्यात् संबन्धान्तरं तस्मात् गौणौ शु
द्धौ च विज्ञेयौ इमावारोपाध्यवसानरूपौ सादृश्यहेतू गौर्वाहीक इत्यत्र गौरयमित्यत्र च अन्यत्र हि स्वार्थसहचारिणो गुणा

भेदौ

गोपाहार्थे –

इति
अविवक्षितवाच्ये ...
लक्षणामूलत्वे ...

तोक्तत्वे =

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

विकासो नाम पुष्पधर्मः तेनातिशयितं लक्ष्यते असंकुचितत्वं संबंधः सौरभ्यातिशयोद्बोधः वशीकरणं चेतनधर्मः तेनात्माधीनत्वं लक्ष्यते अभिमतविषये प्रवृत्तिः संबंधः स्वाधीनत्वमभिमतप्रवर्तने कृताशय्यतया यात्वाहृष्टि लोचनप्रवृत्तिरीदृग्भूतमभिमतविषयप्रवृत्त्यादाकुलत्वं लक्ष्यते सम्यक्छलनरूपधर्मः तेनवाक्यत्वं लक्ष्यते कार्यकारणभावः संबंधः वकुलादिवत् सम्यक् छलितिगतेः सकलकार्यकर्म गवाप्य तत्त्वं व्यज्यते संस्पर्शः पर्याप्तत्वप्रयासत्वं चेतनधर्मः तेनापीरत्वं लक्ष्यते कार्यकारणभावः संबंधः अङ्गनानामिव योगो व्यज्यते अङ्कालितत्वं रूपधर्मः तेनकाविमलत्वं लक्ष्यते निविडावयवत्वं संबंधः आलिंगनयोग्यता व्यज्यते उरस्त्वं चेतनधर्मः तेन सातिशयत्वं लक्ष्यते कार्यकारणभावः संबंधः रमणीयत्वं व्यज्यते मोहनं चेतनधर्मः तेनातिशयितत्वं लक्ष्यते कार्यकारणभावः संबंधः स्वप्नतुल्यत्वं व्यज्यते [illegible] प्रयोजनमिति सूक्ष्मः कर्तव्यः तस्य

गो वाहीक इत्यादि जाड्यमांद्यादयो लक्षणया गौणी अपि गोपाद्यर्थस्य वाच्याभिधाने प्रवृत्तिनिमित्तत्वं व्याप्तौ निवर्तेयितुं स्वार्थसहचारित्वगुणभेदेन परार्थग
ता गुणा एव लक्ष्यन्ते ननु परार्थाभिधीयत इत्यन्ये॥ तादात्म्यगुणाश्रये नपरार्थ एव लक्ष्यते इत्यपरे। उक्तं चान्यत्र अभिधेयाविनाभूतप्रतीति
र्लक्षणोच्यते॥ लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता इति अविनाभावोऽत्र संबंधमात्रं ननु नान्तरीयकत्वं तत्वे हि मञ्चाः क्रोशन्ति इत्यादौ
लक्षणा न स्यात् अविनाभावे चाक्षेपेणैव सिद्धेः लक्षणाया नोपयोग इत्युक्तं आयुर्घृतं आयुरेवेदमित्यादौ च सादृश्याद्यन्यत्कार्यकारणभावादि संबं
धान्तरं एवमादौ च कार्यकारणभावादि लक्षणा सर्वत्र सारोपा साध्यवसाना अशुद्धगौणभेदयोर्भेदेऽपि नोद्धृतौ स्वरूपतः [illegible] सर्वेषां च भेदानां प्रयो
जनं शुद्धभेदयोरन्यवैलक्षण्येनाप्यभिचारिण कार्यकारित्वादि कचित्तादर्थ्यादयः प्रकाराः यथा इन्द्रार्था स्थूणा इन्द्रः कचित्स्वस्वामिभावात्
यथा राजकीयः पुरुषो राजा क्वचिद् अवयवावयविभावात् यथा अग्रहस्त इति हस्तः क्वचित्तात्कर्म्यात् यथा अतक्षा तक्षा [illegible] प्रयोजनम्॥ व्यंजनव्यापारगम्यमेव तच्च
दो लक्षणा तेन षड्विधा सा प्राधान्याद्भेदा अस्याः साच व्यंग्येन रहिता कदाचित् सहितास्तु प्रयोजने॥ प्रयोजनं हि व्यंजनव्यापारगम्यमेव
प्रथमः गूढमगूढं वा तच्चेति व्यंग्यं तत्र गूढं यथा॥ मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितं समुच्छलितविभ्रमं गतिरपास्तसंस्थामतिः॥ उरो मु
कुलितस्तनं जघनमंसबंधोद्धुरं बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते॥ अत्र असितादिविकासादिना अस्तन्त्वादि लक्ष्यते अगूढं यथा
श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम्॥ उपदिशति कामिनीनां यौवनमद एव ललितानि॥ अत्र उपदिशतीति [illegible]
पितामृते व्यंग्यार्थ व्यंग्यार्थ व्यंग्याचारित्वे लक्ष्ये [illegible] शब्द इति संबध्यते तच्च तदाश्रयः॥ तत्र व्यापारो व्यंजनात्मकः कुत इत्याह
यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते॥ फले शब्दैकगम्येऽत्र व्यंजनान्नापरा क्रिया॥ प्रयोजनं प्रति पिपादयिषया यत्र लक्ष
णा शब्दप्रयोगस्तत्र नान्यततस्तत्प्रतीतिः अपितु तस्मादेव शब्दात् नचात्र व्यंजनादृतेऽन्यो व्यापारः तथाहि नाभिधा समयाभावात् हे
तो गंगायां घोष इत्यादौ ये पावनत्वादयो धर्मास्तटादौ प्रतीयन्ते तत्र गंगादिशब्दाः संकेतिताः हेत्वभावान्न लक्षणा मुख्यार्थबाधा
दित्रयं हेतुः तथा च॥ लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो॥ न प्रयोजनमेतस्मिन् न च शब्दः स्खलद्गतिः॥ यथा गंगाशब्दः स्रोतसि
सबाध इति तटं लक्षयति तद्यदि तटेऽपि सबाधः स्यात् तत्प्रयोजनं लक्षयेत् न च तटं मुख्योऽर्थः नाप्यत्र बाधो न च गंगाशब्दार्था
र्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः संबंधः नापि प्रयोजने लक्ष्ये किंचित्प्रयोजनं नापि गंगाशब्दस्तटमिव प्रयोज
नं प्रतिपादयितुमसमर्थः एवमप्यनवस्था स्यात् यामूलक्षयकारिणी॥ एवमपि प्रयोजनं चेल्लक्ष्यते तदपि प्रयोजनान्तरेण तदपि
प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृदनवस्था स्यात् ननु पावनत्वादिधर्मयुक्तमेव तटं लक्ष्यते गंगायास्तटे घोष इत्यतोऽधिकस्यार्थ
स्य प्रतिपत्तिश्च प्रयोजनमिति विशिष्टे लक्षणा किं व्यंजनेनेत्याह प्रयोजनेन सहितं लक्षणीयं न युज्यते॥ कुत इत्याह॥ ज्ञानस्य विष
यो ह्यन्यः फलमन्यदुदाहृतम्॥ प्रत्यक्षादेर्नीलादिर्विषयः फलं तु प्रकटता संवित्तिर्वा विशिष्टे लक्षणा नैवम्॥ व्याख्यातम्॥
विशेषाः स्युस्तु लक्षिते तटादौ विशेषाः पावनत्वादयस्ते चाभिधा तात्पर्यलक्षणाभ्यो व्यापारान्तरेण गम्याः॥ तच्च व्यंजनं
ध्वननादि शब्दवाच्यमवश्यमेषितव्यम्॥ एवं लक्षणामूलं व्यंजकत्वमुक्तं अभिधामूलं त्वाह॥ अनेकार्थस्य

अस्य गवाक्षप्रतीनामप्रतीनामार्थस्य [illegible] प्रतीतिः व्यंजनव्यापारः

[illegible] मार्गे [illegible]

अत्रैव तेन [illegible]

श्लोक [illegible]

प्रयोजनः या

नत्राद्य

नत्राद्य

[illegible marginal commentary]

३

शब्दस्य वाचकत्वे नियंत्रिते संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरंजनं ॥ संयोगो विप्रयोगश्च साहचर्यं विरोधिता अर्थः प्रकरणं लिंगं शब्दस्यान्यस्य
सन्निधिः ॥१॥ सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥२॥ इत्युक्तदिशा सशंखचक्रो हरिः अशं-
खचक्रो हरिः। हरिरित्युच्यते रामलक्ष्मणाविति दाशरथौ। रामार्जुनगतिस्तयोरिति भार्गवकार्तवीर्ययोः स्थाणुं भज भवच्छिदे इति हरे सर्वं
जानाति देव इति युष्मदर्थे कुपितो मकरध्वज इति कामे देवस्य पुरारातेरिति शंभौ मधुना मत्तः कोकिल इति वसंते पातु वो दयितामुख
मिति सांमुख्ये भात्यत्र परमेश्वरः इति राजधानीरूपात् देशात् राजनि चित्रभानुर्विभातीति दिने रवौ रात्रौ वह्नौ मित्रं भातीति सुहृदि मित्रो भातीति
रवौ इंद्रशत्रुरित्यादौ वेदे एव न काव्ये स्वरो विशेषप्रतीतिकृत् आदिग्रहणात् एद्दहमेत्तत्थणिआ एद्दहमेत्तेहिं अच्छिवत्तेहिं एद्दहमेत्ताव
त्था एद्दहमेत्तेहिं दिअएहिं ॥ इत्यादावभिनयादयः इत्थं संयोगादिभिरर्थान्तराभिधायकत्वे निवारितेऽप्यनेकार्थस्य शब्दस्य यत्क्वचिदर्थान्त
रप्रतिपादनं तत्र नाभिधा नियमनात्तस्याः न लक्षणा मुख्यार्थबाधाद्यभावादपितु अंजनं व्यंजनमेव व्यापारः यथा ॥ भद्रात्मनो दुरधिरोह
तनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य ॥ यस्यानुपप्लुतगतेः परवारणस्य दानांबुसेकसुभगः सततं करोऽभूत् ॥१॥ तद्युक्तो
व्यंजकः शब्दः तद्युक्तो व्यंजनयुक्तः यत्सोऽर्थान्तरयुक् तथा ॥ अर्थोऽपि व्यंजकस्तत्र सहकारितया मतः तथेति व्यंजकः इति काव्यप्रकाशे
शब्दनिर्णयो नाम द्वितीय उल्लासः ॥२॥ अर्थाः प्रोक्ताः पुरा तेषां वाच्यलक्ष्यव्यंग्या वाचकलाक्षणिकव्यंजकानां अर्थो व्यंजकतां चानि
कीदृशीत्याह ॥ वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः ॥ प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषां ॥ योऽर्थस्यान्यार्थधीहेतु
र्व्यापारो व्यक्तिरेव सा ॥ बोद्धव्यः प्रतिपाद्यः काकुर्ध्वनिर्विकारः प्रस्तावः प्रकरणं ॥ अर्थस्य वाच्यलक्ष्यव्यंग्यात्मनः क्रमेणोदाहरणानि ॥ अइपिहु
लं जलकुंभं घेत्तूण समागदम्हि सहि तुरिअं ॥ समसेअसलिलणीसासणीसहा वीसमामि खणं ॥१॥ अत्र चौर्यरतगोपनं गम्यते ओण्णिद्दं दोब्ब
ल्लं चिंता अलसत्तणं सणीससिअं मह मंदभाइणीए केरं सहि तुह वि अहह परिहवइ ॥१॥ अत्र दूत्यास्तत्कामुकोपभोगो व्यज्यते ॥ तथाभूतां
दृष्ट्वा नृपसदसि पांचालतनयां वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ॥ विराटस्यावासे स्थितमनुचितारंभनिभृतं गुरुः खेदं खिन्ने मयि
भजति नाद्यापि कुरुषु ॥१॥ अत्र मयि न योग्यः खेदः कुरुषु तु योग्य इति काकुः प्रकाश्यते न च वाच्यसिद्ध्यंगमत्र काकुरिति गुणीभूतव्यंग्यत्वं शं
क्यं ॥ प्रश्नमात्रेणापि काकोर्विश्रांतेः ॥ तइआ मह गंडत्थलणिमिअं दिट्ठिं ण णेसि अण्णत्तो ॥ एह्णिं सच्चेअ अहं ते अ कवोला ण सा दिट्ठी ॥१॥ अत्र मत्सखीं
कपोलप्रतिबिंबितां पश्यतस्ते दृष्टिरन्यैव जातेत्यहो प्रच्छन्नकामुकत्वं ते इति व्यज्यते ॥ उद्देशोऽयं सरसकदलीश्रेणिशो
भातिशायी कुंजोत्कर्षांकुरितरमणीविभ्रमो नर्मदायाः ॥ किं चैतस्मिन्सुरतसुहृदस्तन्वि ते वांति वाता येषामग्रे सरति कलिताकांडकोपो मनोभूः ॥१॥ अत्र
रतार्थं प्रविशेति व्यंग्यं ॥ णोल्लेइ अणोल्लमणा अत्ता मं घरभरम्मि सअलम्मि ॥ खणमेत्तं जइ संझाइ होइ ण व होइ वीसामो ॥१॥ अत्र संध्या संकेतकाल इति त
टस्थं प्रति कयापि द्योत्यते ॥ सुव्वइ समागमिस्सदि तुज्झ पिओ अज्ज पहरमेत्तेण ॥ एमेअ किंत्ति चिट्ठसि ता सहि सज्जेसु करणिज्जं ॥१॥ अत्रोपपतिं प्र
त्यभिसर्तुं प्रस्तुता न युक्तमिति कयाचिन्निवार्यते ॥ अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः ॥ नाहं हि दूरं भ्रमितुं समर्था प्रसीदतायं र
चितोऽञ्जलिर्वः ॥ अत्र विविक्तोऽयं देश इति प्रच्छन्नकामुकस्त्वयाभिसार्यतामिति आश्वस्तां प्रति कयाचिन्निवेद्यते ॥ गुरुजनपरतंत्रतया बत कि।

[illegible marginal commentary]

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

भणामिति हुमन्दभाग्यिणीम्प्रह । अज्ज पवासवचेसि वग्रसग्गमेयत्नोसि करणिज्जा ।। अत्रायमधुसमयेयदि व्रजसि तदा हर्तव्यजीवानि नवतुनजाना
मि गतितिदिनिव्यज्यते आदि ग्रहणाच्चेष्टाय यत्र वैशिष्ट्यम्यथा ।। द्वारोपि तनिरन्तरे मयि तत्पार्श्वेसद्भिया प्रोल्लास्येन सुरगंगयर स्परसमास तसमा
सादितन्त्र ।। आनीत पुरतः शिरोंशुकमधः क्षिप्ते चले लोचने वाचस्तत्र निवारितं प्रसरणं संकोचिते दोर्लते ।। अत्र चेष्टायाश्च तुर्थ्याः कालस्य च विषय
ताव्यंग्यपोपव्यंजकत्वमुदाहार्यम् । वक्त्रादीनां मिथः संयोगे द्विकादिभेदेव्यंग्यतेन जातिमेल
नाए महाणउ सज्जिहसि ।।१।। एवं प्रमाणवेद्योर्थो वा न तस्यांतरयत्नः अर्थस्य व्यंजकत्वे तच्छब्दस्य सहकारिता ।। शब्दप्रमाणे तर वेद्यो
र्थो व्यंजकः ।। इति काव्यप्रकाशे अर्थव्यंजकता निर्णयो नाम तृतीय उल्लासः ।।३।। यद्यपि शब्दार्थयो निर्णये कृते दोषगुणालंकाराणां स्वरूपमभि
धानीयम् ।। तथापि धर्मिणि प्रदर्शिते धर्माणां हेयोपादेयतां ज्ञायत इति प्रथमं काव्यभेदानाह ।। अविवक्षितवाच्यस्तत्र वाच्यं भवेद्ध्वनौ । अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम् ।। लक्षणामूलगूढव्यंग्यप्राधान्ये सत्यविवक्षितवाच्यो यत्र स ध्वनिरित्यनुवादात् ध्वनिरिति ज्ञेयः तत्र वाच्यं क्वचिद
नुपयुज्यमानत्वादर्थान्तरे परिणमितं यथा ।। त्वामस्मि वच्मि विदुषां समवायोत्र तिष्ठति ।। आत्मीयां मतिमादाय स्थितिमत्र विधेहि तत् ।।१।। क्वचिदनुपपद्यमानतया अत्यन्तं तिरस्कृतम् ।। यथा ।। उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परं ।। विदधदीदृशमेव सदा सखे सुखितमास्व ततः शरदां शतम् एतदपकारिणं प्रतिविपरीतलक्षणया कश्चिद्वक्ति ।। विवक्षि
तं चान्यपरं वाच्यं यत्रापरस्तु सः ।। अन्यपरं व्यंग्यनिष्ठम् एष च ।। कोप्यलक्ष्यक्रमव्यंग्यो लक्ष्यव्यंग्यक्रमः परः ।। अलक्ष्येति ।। न खलु विभावा
नुभावव्यभिचारिण एव रसाः ।। अपितु रसस्तैरित्यस्ति क्रमः स तु लाघवान्न लक्ष्यते ।। तत्र रसभावतदाभासभावशान्त्यादिरक्रमः ।। भिन्नो रसाद्यलं
कारादलंकार्यतया स्थितः ।। आदिग्रहणाद्भावोदयभावसन्धिभावशबलत्वानि प्रधानतया यत्र स्थितो रसादिः तत्रालंकार्यः यथोदाहृत
ध्वते ।। अन्यत्र तु प्रधानेवाक्यार्थे यत्राङ्गभूतो रसादि स्तत्र गुणीभूतव्यंग्ये रसवत्प्रेयऊर्जस्वि समाहितादयो लंकाराः तेच गुणीभूतव्यङ्ग्यो
भिधाने उदाहरिष्यंते ।। तत्र रसस्वरूपमाह ।। कारणान्यथ कार्याणि सहकारीणि यानि च ।। रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ।। विभा
वा अनुभावास्तत्कथ्यन्ते व्यभिचारिणः ।। व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः ।। उक्तं हि भरतेन ।। विभावानुभावव्यभिचारिसंयोगाद्रसनि
ष्पत्तिरिति एतद्विवृण्वते ।। विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः स्थायी रत्यादिको भावो जनितः अनुभावैः कटाक्षभुजाक्षेपप्रभृ
तिभिः कार्यैः प्रतीतियोग्यः कृतः व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितः मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपतानुसंधानान्नर्तकेऽपि
प्रतीयमानो रस इति भट्टलोल्लटप्रभृतयः ।।१।। राम एवायमयमेव राम इति न रामोयमित्यौत्तरकालिके बाधे रामोयमिति रामः स्यादा न वायमिति राम
सदृशोयमिति सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुरगादिन्यायेन रामोयमिति प्रतीत्या ग्राह्ये नटे ।। सेयं ममांगेषु सुधारस
च्छटा सुधरकर्पूरशलाकिका दृशोः मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गतेति ।।१।। दैवादहमद्य तया चपलायतनेत्र

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

का. प्र. ७

यावियत्नकृष्ण अविरलविलोल जलदः कालः समुपागत इत्यादि काव्यार्थानुसंधानबलाच्छिक्षाभ्यासनिर्वर्तितस्वकार्यप्रकटनेन च नटेनैव प्रका-
शितैः कारणकार्यसहकारिभिः कृत्रिमैरपि तथानभिमन्यमानैर्विभावादिशब्दव्यपदेश्यैः संयोगाद् गम्यगमकभावरूपात् अनुमीयमानोऽपि वस्तुसौं-
दर्यबलाद् रसनीयत्वेनान्यानुमीयमानविलक्षणः स्थायित्वेन संभाव्यमानो रत्यादिर्भावस्तत्रासन्नपि सामाजिकानां वासनया चर्व्यमाणो रस इति श्रीशङ्कुकः ॥
नाटस्यानन्तात्मगतत्वेन रसः प्रतीयते नोत्पद्यते नाभिव्यज्यते अपि तु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भाव-
कत्वव्यापारेण भाव्यमानः स्थायी सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्त्वेन भोगेन भुज्यत इति भट्टनायकः ॥३॥ लोके प्रमदादिभिः
कारणादिभिः स्थाय्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापारवत्त्वादलौकिकविभावादिश-
ब्दव्यवहार्यैर्ममैवैते शत्रोरेवैते तटस्थस्यैवैते न ममैवैते न शत्रोरेवैते न तटस्थस्यैवैते इति संबन्धिविशेषस्वीकारपरिहारनियमानध्यवसायात्साधा-
रण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात्तत्कालविग-
लितपरिमितप्रमातृभाववशोन्मिषितवेद्यान्तरसंपर्कशून्यापरिमितभावेन प्रमात्रा सकलसहृदयसंवादभाजा साधारण्येन स्वाकार इवाभि-
न्नोऽपि गोचरीकृतश्चर्व्यमाणतैकप्राणो विभावादिजीवितावधिः पानकरसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वा-
ङ्गीणमिवालिङ्गन्नन्यत्सर्वमिव तिरोदधद् ब्रह्मानन्दास्वादमिवानुभावयन्नलौकिकचमत्कारकारी शृङ्गारादिको रसः। स च न का-
र्यो विभावादिविनाशेऽपि तस्य संभवप्रसङ्गात्। नापि ज्ञाप्यः सिद्धस्य तस्याभावात्। अपि तु विभावादिभिर्व्यञ्जितश्चर्वणीयः। कारककारकज्ञापकाभ्यामन्यत्क्व दृष्टमिति चेन्न क्वचिद्दृ-
ष्टमित्यलौकिकत्वसिद्धेर्भूषणमेतन्न दूषणम्। चर्वणानिष्पत्त्या तस्य निष्पत्तिरुपचरितेति कार्योऽप्युच्यताम्। लौकिकप्रत्यक्षादिप्रमाणताटस्थ्यावबोधशालिपरिमितयोगिज्ञानवे-
द्यान्तरसंस्पर्शरहितस्वात्ममात्रपर्यवसितपरिमितेतरयोगिसंवेदनविलक्षणलोकोत्तरस्वसंवेदनगोचर इति प्रत्येयोऽप्यभिधीयताम्। तद्ग्राहकं च न निर्विकल्पकम् विभावादिपरा-
मर्शप्रधानत्वात्। नापि सविकल्पकम् चर्व्यमाणस्यालौकिकानन्दमयस्य स्वसंवेदनसिद्धत्वात्। उभयाभावरूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति न तु विरोधमिति
श्रीमदाचार्याभिनवगुप्तपादाः। व्याघ्रादयो विभावा भयानकस्येव वीराद्भुतरौद्राणाम्। अश्रुपातादयोऽनुभावाः शृङ्गारस्येव करुणभयानकयोः। चिन्तादयो व्यभिचारिणः शृङ्गारस्येव वीर-
करुणभयानकानामिति पृथगनैकान्तिकत्वात् सूत्रे मिलिता एव निर्दिष्टाः। वियदलिमलिनाम्बुगर्भमेघं मधुकरकोकिलकूजितैर्दिशां श्रीः। धरणिरभिनवाङ्कुराङ्कटङ्का प्रणतिपरे दयिते प्रसीद
मुग्धे इत्यादौ परिस्यन्दितम्। परिम्लानं पीनस्तनजघनसङ्गादुभयतस्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्। इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः कृशाङ्ग्याः संतापं वदति बिसिनीपत्रशयनम्।। इत्यादौ
दूरादुत्सुकमागते विवलितं संभाषिणि स्फारितं संश्लिष्यत्यरुणं गृहीतवसने किंचाञ्चितभ्रूलतम्। मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं चक्षुर्जातमहो प्रपञ्चचतुरं जा-
तागसि प्रेयसि इत्यादौ यद्यपि विभावानामनुभावानां औत्सुक्यव्रीडाहर्षकोपासूयाप्रसादानां व्यभिचारिणां च केवलानामेवात्र स्थितिः तथाप्येतेषामसाधारणत्वमित्यन्यतम-
द्वयाक्षेपकत्वे सति नानैकान्तिकत्वम्। तद्विशेषानाह। शृङ्गारहास्यकरुणरौद्रवीरभयानकाः। बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः। तत्र शृङ्गारस्य द्वौ भेदौ संयो-
गो विप्रलम्भश्च। तत्राद्यः परस्परावलोकनालिङ्गनाधरपानचुम्बनाद्यनन्तभेदत्वादपरिच्छेद्य एक एव गण्यते यथा शून्यं वासगृहं विलोक्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अत्रालंबनं विष्णुशर्मा तेदनाद्युद्दीपनं लज्जादयो व्यभिचारिणः वैवर्ण्यादयोऽनुभावाः ॥ अभिलाषेण योगः संगृहीतः अभिलाषादिचतुष्कमिश्रं कारणं विरहस्ते नमरणादिरपि लक्ष्यते विरहेणाकरुणे विप्रलंभः संगृहीतः नचकरुणे नपुंगार

पुरुषमिति मानादिति यत्प्रियस्य सम्भुते जीवनं न प्रयातोऽनन्तरमेव विरहेणैव न संगतः ... सौलभ्यात ... प्रवासहेतुकः ...

... इति भजते ॥२॥ विरहोत्कंठितादि ... भवप्रवासहेतुकमिति ... प्रियसखे इति वचनादिषु ...

... सर्वत्र ... सुप्रयोजनीयम् ... नेत्रं ... इति विशेषः ... सार्थपदं ...

... प्रवासहेतुकोऽयथा मम केचिदकिंशशि ... संचरद्भिः ... विनादमशा विनिनवे नवपल्लवानि भविष्य ... प्रियतमा याः प्रियायाः केवलमिति वचो जी-

वितयोराशीस्तरोऽनिस्सारतोरणः ॥ ८

शयनाद्युत्थायकिंचिच्छनैर्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखं ॥ विस्रब्धं परिचुंब्य जातपुलकामालोक्य गंडस्थलीं लज्जानम्रमुखी प्रियेण हसता बाला चि-
रं चुंबिता ॥१॥ यथा ॥ विहस्यादितिनैर्वैकलिकैर्यो धत्ते मनोहारिणीं लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि ॥ प्रत्याख्यानविधिं समीक्ष्य सखीनेत्रोत्सवा-
नंदितो नियातः शनकैरलीकवचनोपन्यासमालीजनः ॥ अथ विरहः सप्रमिलाजविरहेर्ष्याप्रवासशापहेतुक इति चतुर्विधः क्रमेणोदाहरणानि ॥ प्रेमार्द्राः प्र-
णयस्पृशः परिचयादुद्गाढरागोदयास्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ॥ यास्वंतःकरणस्य बाह्यकरणव्यापाररोधी क्षणादाशंसापरिकल्पि-
तास्वपि भवत्यानन्दसांद्रोदयः ॥१॥ अस्ते च व्रजतीति का खलु कथा नाप्यस्य नाहं क्षमा हृदयोमेन्हृतिना गलत्यसहा साकोयं विधेः क्रमः । इत्यल्पेतरकल्प-
नाकवलितस्वांता निशान्तरे बाला वृन्ते विवर्तनव्यतिकरा नाप्नोति निद्रां निशि ॥२॥ एवाविरहोत्कंठिता ॥ सापत्नुः प्रथमापराधसमये सख्योपदे-
शं विना नो जानाति सविभ्रमांगवलनावक्रोक्तिसंसूचनं । स्वच्छैरच्छकपोलपालिगलितैः पर्यस्तनेत्रोत्पला बाला केवलमेव रोदिति लु-
ठल्लोलालकैरश्रुभिः ॥३॥ अस्या नवलयैः कृतं प्रियसखे खेदैर जस्वगतं घनस्यानन्दनात्मासितं व्यवसितं चित्तेन गत्नुपुरः ॥ यातुं निश्चलचेतसि
प्रियतमे सर्वे समं प्रस्थिता गंतव्ये सति जीवितप्रियसुहृत्सार्थः किमु त्यज्यते ॥४॥ त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायामात्मानं ते
चरणपतितं यावदिच्छामि कर्तुम् ॥ अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतांतः ॥५॥ हास्यादीनां क्र-
मेणोदाहरणानि ॥ आकुंच्य पाणिमशुचिं मम मूर्ध्नि वेश्या मंत्रांभसां प्रतिपदं पृषतैः पवित्रे ॥ तारस्वरं प्रहितथूत्कमदात्प्रहारं हाहा हतो-
हमिति रोदिति विष्णुशर्मा ॥१॥ हा मातस्त्वरितासि कुत्र किमिदं हा देवताः क्वाशिषो धिक्प्राणान्पतितोऽशनिर्हुतवहस्तेंऽगेषु दग्धे दृशौ । इत्थं घर्घरम-
ध्यरुद्धकरुणाः पौराङ्गनानां गिरश्चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि ॥ कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभिर्निर्मर्यादैर्भव-
द्भिरुदायुधैः ॥ नरकरिपुणा सार्धं तेषां सभीमकिरीटिनामयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥१॥ दुर्धर्षाः संत्रासमेनं विजहत हरयः क्षुण्ण-
शक्रेभकुम्भा युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतंतः ॥ सौमित्रे तिष्ठ पात्रं त्वमसि नहि रुषां नन्वहं मेघनादः किंचिद्भ्रूभङ्गली-
लानियमितजलधिं राममन्वेषयामि ॥ ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यंदने बद्धदृष्टिः पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायं ॥ दर्भैरर्धा-
वलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥१॥ उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेध-
भूयांसि मांसान्यंसस्फिक्पृष्ठपिंडाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ॥ आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरंकः करंकादंकस्थादस्थिसंस्थं
स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥१॥ चित्रं महानेष तवावतारः क्व कांतिरेषाभिनवैव भंगिः ॥ लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एष सर्गः ॥
एषां स्थायिभावानाह ॥ रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ॥ जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥ स्वाहा ॥ व्यभिचारिणो वृत्ते
निर्वेदग्लानिशंकाख्यास्तथासूयामदश्रमाः ॥ आलस्यं चैव दैन्यं च चिंता मोहः स्मृतिर्धृतिः ॥ व्रीडा चपलता हर्ष आवेगो जडता तथा गर्वो वि-

... विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः ॥ आत्मभावं नयत्यन्यान्स स्थायी लवणाकरः ॥ इति स्थायिभावलक्षणम् ... विरुद्धैर्विजातीयैः अभिचार्यादिभिरविरुद्धैः सजातीयैः स्थायी तेरेतिरस्कृतः ॥ तत्पवृक्त ... यथा मलत्या मालत्या ... विक्रय ...

... मालतीमाधवे श्मशानाके जुगुप्सादिभिरविच्छिन्ना ... आत्मभावमिति ... विशेषणत्वात् ... मनोनुकूलार्थविषयकसंवेदनं रतिः ... विकृतवाग्वेषादिविषयकं ज्ञानं हासः इष्टवि-

... वियोगे सति ... शोकः अपकारित्वेन प्रतिकूलज्ञानं क्रोधः मयेदं कार्यमित्यध्यवसाय उत्साहः भयहेतुदर्शनजन्य ... भयं ... गोचरं ... ज्ञानं जुगुप्सा लोकसीमातिक्रान्ते-

... विस्मयः इति ... प्रतीता ... नचस्थायिनः कल्पनसंभेदानुपपत्तिः ... नहि स्थायिमात्रं रसोऽपि तु ... नचविषयत्वानामसर्वस्थायिनो हासस्य निर्विषयत्वा-

... विशेषिकटकस्य ... अतएव रसभेदा ... इति ... इति ॥२॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रिहत्रास्र विरुद्धावाधयंति ये भावास्तेषामुत्तमाः आनन्दांकुरकन्दोसौ भावः स्थायिपदास्पदम् । असंगलप्रायस्येति अमंगलवत्कलस्य ॥ तेन निर्वेद इति नत्रकृतिको रसः । अयमर्थः यत्र निर्वेदो विषयेष्वलं प्रत्ययरूपो [illegible]
[illegible] सर्वत्र [illegible] यत्कामसुखं लोके यच्च दिव्यं महत्सुखम् [illegible] नार्हतः षोडशीं कलामिति तस्माच्छमो [illegible]
[illegible] इति [illegible] विस्तरः ॥

का०
प्र०
५

वाद औत्सुक्यं निद्रापस्मार एव च सुप्तिर्विबोधोमर्षश्चाप्यवहित्थमथोग्रता ॥ मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ त्रासश्चैव वितर्कश्च विज्ञेया व्य-
भिचारिणः । त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः । निर्वेदस्यामङ्गलप्रायस्य प्रथममनुपादेयत्वेप्युपादानं व्यभिचारित्वेपि स्थायिता-
भिधानार्थम् ॥ तेन निर्वेदस्य स्थायिभावत्वे शान्तोपि नवमो रसः ॥ यथा ॥ अहौ वा हारे वा कुसुमशयने वा दृषदि वा मणौ वा लोष्ठे वा बलवति रिपौ
वा सुहृदि वा तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः क्वचित्पुण्यारण्ये शिव शिव शिवेति प्रलपतः ॥१॥ रतिर्देवादिविषया व्यभिचारी तथा-
ञ्जितः । भावः प्रोक्तः आदिशब्दान्मुनिगुरुनृपपुत्रादिविषया कान्तादिविषया तु व्यक्ता शृङ्गारः ॥ उदाहरणम् ॥ कण्ठकोणविनिविष्टमीश ते
कालकूटमपि मे महामृतम् ॥ अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते ॥१॥ हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृ-
तं शुभैः शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेपि योग्यताम् ॥ एवमन्यदप्युदाहार्यम् ॥ व्यभिचारी यथा ॥ जाने कोपपराङ्मुखी प्रियतमा स्वप्नेद्य
दृष्टा मया मा मां संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता ततः ॥ नो यावत्परिरभ्य चाटुकशतैराश्वासयामि प्रियाम्भ्रातस्तावदहं शठेन विधिना निद्रादरिद्री-
कृतः ॥१॥ अत्र विधिं प्रत्यसूया ॥ तदाभासा अनौचित्यप्रवर्तिताः । तदाभासा रसाभासा भावाभासाश्च ॥ तत्र रसाभासो यथा ॥ स्तुमः कं वामाक्षि क्षण-
मपि विना यं न रमसे विलेभे कः प्राणान्रणमखमुखे यं मृगयसे ॥ सुलग्ने को जातः शशिमुखि यमालिङ्गसि बलात्तपःश्रीः कस्यैषा मदननगरि ध्या-
यसि तु यम् ॥१॥ अत्रानेककामुकविषयमभिलाषं तस्याः स्तुम इत्याद्यनुगतबहुव्यापारोपादानं व्यनक्ति ॥ भावाभासो यथा ॥ राकासुधाकं-
रमुखी तरलायताक्षी सा स्मेरयौवनतरङ्गितविभ्रमाङ्गी ॥ तत्किं करोमि विदधे कथमत्र मैत्रीं तत्स्वीकृतिव्यतिकरे क इवाभ्युपायः ॥१॥ अत्र चिन्तायामनौ-
चित्यप्रवर्तिता । एवमन्येप्युदाहार्याः ॥ भावस्य शान्तिरुदयः सन्धिः शबलता तथा ॥ क्रमेणोदाहरणानि ॥ तस्याः सान्द्रविलेपनस्तनयुगप्रश्लेषमुद्राङ्कितं
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते ॥ इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया साश्लिष्टा रभसेन तत्सुखवशात्तन्व्या च तद्विस्मृतम् ॥
अत्र कोपस्य ॥ एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया सद्यः कोपपराङ्मुखं ग्लपितया चाटूनि कुर्वन्नपि । आवेगादवधीरितः प्रियतमस्तूष्णीं
स्थितस्तत्क्षणान्मा भूत्सुप्त इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः ॥१॥ अत्र औत्सुक्यस्य ॥ उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतः सत्सङ्ग-
प्रियता च वीररभसोत्फालश्च मां कर्षतः ॥ वैदेहीपरिरम्भ एव च मुहुश्चैतन्यमामीलयन्नानन्दी हरिचन्दनेन्दुशिशिरस्निग्धो रुणद्ध्यन्यतः ॥१॥
अत्रावेगहर्षयोः ॥ क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोपि दृश्येत सा दोषाणां प्रशमाय मे श्रुतमहो कोपेपि कान्तं मुखम् ॥ किं वक्ष्यन्त्यपकल्मषाः
कृतधियः स्वप्नेपि सा दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योधरं धास्यति ॥१॥ अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानाम् ॥
भावस्थितिरुक्ता चोदाहृता च ॥ मुख्ये रसेपि तेङ्गित्वं प्राप्नुवन्ति कदाचन ॥ ते भावशान्त्यादयः । अङ्गित्वं राजानुगतविवाहप्रवृत्तभृत्यवत् ॥ अनु ॥
स्वानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिरस्तु यः ॥ शब्दार्थोभयशक्त्युत्थे व्यङ्ग्येनुस्वानसन्निभः ध्वनिः ॥ शब्दशक्तिमूलानुरणनरूपव्यङ्ग्योर्थशक्तिमूलानु ॥

[illegible] नभावो रसवर्जित इति वचनान्मुख्यस्य स्थायिनः [illegible] मुख्यरसेति यत्र तत्तथा विभावादीनां [illegible] विषयीकरणं [illegible]
[illegible] भावध्वनिः [illegible] विवेकः [illegible] व्यभिचारिप्रमेतयः [illegible]
[illegible] व्यभिचार्यादीनां [illegible] भावास्थितिः [illegible]
[illegible] सजातीयसंदेहे [illegible] विभावादिसंवलनात् [illegible]
[illegible] भावोदाहरणानि [illegible] कोपि [illegible]
[illegible] नायिकादि [illegible] भावशान्त्यादयः प्राधान्यं [illegible]
[illegible] तथा [illegible] अयमर्थः [illegible]
[illegible] इत्यभिधानात् [illegible]

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यस्तानहुर्पवउभयशक्तिमूलानुरणनरूपव्यंग्य ... ऽलंकृतिस्त्रिधा॥ तत्र॥ अलंकारो वस्तु बलाद्यत्रावभासते॥ प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा॥ वस्त्वेवेत्यनलंकारं वस्तुमात्रमुच्यते॥ अत्राद्यो यथा॥ उल्लास्य कालकरवालमहाम्बुवाहं देवेन येन जरठोर्जितगर्जितेन॥ निर्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः॥१॥ अत्र वाक्यस्यासंबद्धार्थाभिधायकत्वं मा प्रसाङ्क्षीदिति प्राकरणिकाप्राकरणिकयोरुपमानोपमेयभावः कल्पनीय इत्यत्रोपमालंकारो व्यंग्यः॥ तिग्मरुचिरप्रतापो विधुरनिशाकृद्विभो मधुरलीलः॥ मतिमानतत्त्ववृत्तिः प्रतिपदपक्षाग्रणीर्विभाति भवान्॥१॥ अत्रैकैकस्य पदस्य द्विपदत्वे विरोधाभासः॥ अप्रतिहतप्रतापः अविधुरः निशाकृत् ... सहितः साधुपक्षाग्रणी रसनामसित्यत्रापि विरोधाभासः॥ निरूपादानसंभारमभित्तावेव तन्वते॥ जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने॥१॥ अत्र व्यतिरेकः॥ अलङ्कारस्याथ वस्तुमात्रं यथा॥ पन्थिअ ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे॥ उण्णअपओहरं पेक्खिऊण जइ वससि ता वससु॥१॥ अत्र यद्युपभोगक्षमोऽसि तदास्स्वेति वस्तु व्यज्यते॥ शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम्॥ यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च॥१॥ अत्र विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुत इति वस्तु व्यज्यते॥ अर्थशक्त्युद्भवोऽप्यर्थो व्यञ्जकः संभवी स्वतः॥ प्रौढोक्तिमात्रसिद्धो वा कवेस्तेनोम्भितस्य वा॥ वस्तु वालंकृतिर्वेति षड्भेदोऽसौ व्यनक्ति यत्॥ वस्त्वलंकारमथवा तेनायं द्वादशात्मकः॥ प्रौढोक्तिं विना स्वतः संभवी ... नकेवलं भणितिमात्रनिष्पन्नो यावद्बहिरप्यौचित्येन संभाव्यमानः॥ कविना प्रौढोक्तिमात्रेण वहिरसन्नपि निर्मितः॥ कविनिबद्धेन वक्त्रेति द्विविधोऽपरः ... इति त्रिविधः॥ वस्तु वालंकारो वेति षोढा व्यञ्जकः॥ तस्य च वस्तु वालंकारो वा व्यङ्ग्य इति द्वादशभेदोऽर्थशक्त्युद्भवो ध्वनिः॥ क्रमेणोदाहरणानि॥ अलसशिरोमणिधुत्ताणं अग्गिमो पुत्ति धणसमिद्धिमओ॥ इअ भणिएण णअंगी पप्फुल्लविलोअणा जाआ॥१॥ अत्र ममैवभोग्य इति वस्तुना वस्तु व्यज्यते॥ धन्यासि या कथयसि प्रियसङ्गमेऽपि विश्रब्धचाटुकशतानि रतान्तरेषु॥ नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किंचिदपि स्मरामि॥१॥ अत्र त्वमधन्याऽहं तु धन्येति व्यतिरेकालंकारः॥ दर्पान्धगन्धगजकुम्भकपाटकूटसंक्रान्तिनिघ्नघनशोणितशोणशोचिः॥ वीरैर्व्यलोकि युधि कोपकषायकान्तिः कालीकटाक्ष इव यस्य करे कृपाणः॥१॥ अत्रोपमालंकारेण सकलरिपुबलक्षयः क्षणात्करिष्यत इति वस्तु॥ गाढकान्तदशनक्षतव्यथासंकटादरिवधूजनस्य यः॥ ओष्ठविद्रुमदलान्यमोचयन्निर्दशन्युधि रुषा निजाधरम्॥ अत्र विरोधालंकारेणाधरनिर्दशनसमकालमेव शत्रवो व्यापादिता इति तुल्ययोगिता॥ मम ... अत्र सहोक्तिरलंकारेण व्यङ्ग्येनाभ्यन्तरस्य दाहस्य तिरस्कृतत्वेऽपि ... प्रौढोक्तिमात्रनिष्पन्नशरीरः संभवी स्वतः॥ एवमुदाहरणेषु स्वतः संभवी व्यञ्जकः॥ केलासस्य प्रथमशिखरे वेणुसंमूर्छनाभिः श्रुत्वा कीर्तिं विबुधरमणीगीयमानां यदीयाम्॥ स्रस्तापाङ्गाः सरसबिसिनीकाण्डसंजातशङ्का दिङ्मातङ्गाः श्रवणपुलिने हस्तमावर्तयन्ति॥१॥ अत्र वस्तुना येषामप्रार्थितमेव शरदिन्दुधवलादिबुद्धिजननेन चमत्कारकारित्वं कीर्तिरिति वस्तु ध्वन्यते॥ केसेसु बलामोडिअ तेण समरम्मि जअसिरी गहिआ॥ जह कंदराहि विहुरा तस्स दढं कंठअम्मि संठविआ॥१॥ अत्र केशेषु बलात्कारेण तेन समरे जयश्रीर्गृहीता यथा कंदराभिर्विधुरास्तस्य दृढं कण्ठे स्थापिता इत्येवं विधुराः शत्रवः॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

का
प्र
६

एकमुत्र कर्तृ कृ प्यालिङ्गनसुतिर्पादेतुलासं भवादित्निभावः आदिना प्रमोदः हसितादयः = ३ यास्य विरमिवह सनीकविवरनाम्युरुवत्र दविनिवेशत दर्पायतिधु बनमलहलं मनुपदिनुनयतिमावाली = ४ हसं ती त नेनु सु वाले के
सुनादितेत नेत्र पुरा लाजगत्रिमीलचाचात्रि सं कार्यपः = ३ चेलेकातिरिमेवलासिते लिताः सभोग लिङ्गेरगीणकातेलुन्नपत्रावली कवलनेपादातहरितेक्षम नेरुस्ता सीमलपामिलाविरहितालि निःश्वाससंपर्कि तोजाता कृतिरिधापादिवस
रुलासारुत्पवनविकेत्र सभोग वियोगिनो रती तिपवनस्मातिदा रोत्युतात नाय श्रोत रो रोहि गुलः सुसीमाविनिवर्तितातः = ५ कत्रिये लाहत्य नवे ललि ते नेवाक्षि मसाध्यामि निभावः = ६ निःश्वासेति निश्चिकातिशिशयं तनुलन्ध्यवविशेष कांचित्
निःश्वासः प्रागेव पीडितविकाठः सकृत् कृतः

केशग्रहणावलोकनो दीपितमदनास्वकन्दरास्तदिघुरानूकारोत्कण्ठोत्सवेदा ॥ एकत्र संस्थानेविभ्रमदर्शनात्तस्या रत्यः पलायपगूहाहुतनिष्ठं नीति
काव्यहेतुध्यानयलाव्यगनात्त्वेहेतिरोपितुलनः यदाभवसमाव्यमान्कन्दरानत्यजनीतापकुतिरुः ॥ गाढालिङ्गलरहरु जग्रमिदरएलङ्समोत्स्य रूमा
एलिलीसीमाला पीलालभीतवृहि जाहि ॥ ११ ॥ अत्रोत्युक्तयासंत्यालिंगनादितत्र विजृम्भितमितिवस्तु ॥ जाठेरवह सती कइ वल्लणकुरुहवद्धवि
लिवेसा दावेहुंगुलमंजलमागविश्रु जग्रद्सावाणी अत्रोत्येदयावमत्कारे कोरणनवनवजगदेदजातनस्यात्रिनिमीलनशिव्यतिरेकः ॥ एवकवि
प्रौढोक्तिमात्रनिष्पन्नः जलकेलितिरिसहलाहि खलिदासमे अरिवलारई यास्त्युल्लपत्रावली कवलनेपवादरिदलणतेलहि मलयाणिलाविर
हिलीणीसासससर्गिणोजादाति त्रिसहतणोविंवहलानारएगपूरगविञ ॥ ११ ॥ अत्र निःश्वासैः श्वासैर्ऽमः किं किं न कुर्वन्तीति वस्तुना वस्तुव्यञ्ज
ते सहि विरइउण माणस्स मजधीर तेणश्रासासं ॥ पिअदंसणविहलंकववएणरवाउन्निसहसत्तितलाउसरियं ॥ अत्र वस्तुना अलंकतेषिथा येने
अलंकेतिविभावनाप्रियदर्शनस्यसौभाग्यबलधैर्येणसोढुंनश्चक्यत इति उत्प्रेक्षा चेति उत्केल्लकवएपग्रञ्जरणलक्षण हिमगुहलोअणे सुमह दिसं
रत्न सुपवसंतोकोवेणपुलोइमेणग्रकमिंग्रा अत्र विरमितलोचनेकुपितेवह सीलुजबालकारेणानेकवलसाद्भनखदत्तानिगोपायसि यावते
वामहप्रसादयानं जातेतिवस्तुव्यज्यते ॥ महिलासहस्सभरिए तुह हिअए सुहअ सा अमाअन्ती ॥ अणुदिणमणण्णकम्मा अङ्गं तणुअं वि त
णुएइ ॥ अत्र हेतुलंकारेण तनोस्तनूकरणेपि तव हृदये सा न वर्तत इति विशेषोक्तिः ॥ ४ ॥ एवमेकविंशतिः प्रौढोक्तिमात्रनिष्पन्नशरी
रो द्वादशः एवं द्वादश भेदाः शब्दार्थोभयमनेकः ॥ यथा अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा तारकातरला श्यामा सानन्दं न करोति कम् ॥
भेदाष्टादशस्य ॥ अस्य ध्वनेः ननु रसादीनां बहुभेदत्वे कथमष्टादशेत्यत आह रसादीनामनन्तत्वाद्भेद एको हि गण्यते ॥ अनन्तत्वादिति
तथाहि ॥ नवरसास्तत्र शृंगारस्य द्वौ भेदौ संयोगो विप्रलम्भश्चेति संयोगस्यापि परस्परावलोकनालिंगनपरिचुम्बनादिकुसुमोच्चयजलके
लिसूर्यास्तमयचन्द्रोदयषड्ऋतुवर्णनादयो बहवो भेदाः ॥ विप्रलम्भस्याप्यभिलाषादय उक्ताः ॥ तयोरपि विभावानुभावव्यभिचारिवैचि
त्र्यम् ॥ तत्रापि नायकयोरुत्तममध्यमाधमप्रकृतित्वम् तत्रापि देशकालावस्थादिभेदात्स्वैकस्यैव रसस्यानन्त्यम् ॥ का गणनान्येषाम् ॥
असंलक्ष्यक्रमत्वे तु सामान्यमाश्रित्य रसादिध्वनिरेक एव गण्यते वाक्ये द्व्युत्थः द्व्युत्थ इति शब्दार्थोभयशक्तिमूलः पदेऽप्यन्ये अपिशब्दाद्वाक्ये
एकावयवस्थितेनभूषणेन कामिनीव पदद्योत्येन व्यंग्येन वाक्यव्यंग्यापि भारती भासते तत्र पदप्रकाश्यत्वे क्रमेणोदाहरणानि यस्य मित्राणि
मित्राणि शत्रवः शत्रवस्तथा ॥ अनुकम्प्योनुकम्प्यश्च स जातः स च जीवति अत्र द्वितीयादिमित्रादिशब्दा आश्वस्तत्वनियन्त्रणत्वस्नेहपा
त्रत्वादिभिरर्थान्तरसंक्रमितवाच्यः खलववहारा दीसंति दारुणा जइ वि तह वि धीराणं ॥ हिअअवअस्सबहुमआ णहु ववसाआ विमुज्झन्ति अत्र वि
मुज्झन्तीति लावण्यं तदसौ कान्तिस्तद्रूपं स वचःक्रमः ॥ तदा सुधास्पदमभूदधुना तु ज्वरो महान् ॥ अत्र तदादिपदैरनुभवैकगोचरा अर्था

अलंलक्ष्य क्रमत्वम् प्रबन्धगत संलक्ष्यक्रमतिशीलावल्य कान्तिरुज्ज्वलता रूपं गुणः = १ वचनानि गोचराः वचनादतीतवचनशक्तिः तत्पदशिष्यधर्मप्रकाशकत्वं पदैस्तद्वाक्यप्रकाशकत्वं वाक्यस्य वा बोधकत्वम्
अविवक्षितवाच्यः पदैरर्थान्तरसंक्रमितवाच्यः अत्यन्ततिरस्कृतवाच्यो द्वौ भेदौ विवक्षितान्यपरवाच्यः असंलक्ष्यक्रमव्यङ्ग्यः संलक्ष्यक्रमव्यङ्ग्यः शब्दशक्त्यर्थशक्त्युभयशक्तिमूलः
अर्थशक्त्युद्भवो द्वादशः उभयशक्त्युद्भव एकः एवमष्टादश = ९ एतेषाम् नष्टसंक्रमितावाच्ययोः प्रकाशपदादयः भेदाः तत्र पद पदांश वर्ण रचना प्रबन्ध प्रकाश्यत्वेन भावत एव नुपय
क्रमेण नायिकान्तरसंक्रमितवाच्यवाक्यसमुत्थ मिनालोकः समर्थनेश्चयम् पदप्रकाश्यत्वाद्वाक्यप्रकाश्यत्वाद्रसादीनामेवं ध्वनि: पदकाल्पनिक भावापनयतः शब्दप्रकाशपदेः
वक्ष्यमाणक्रमेण संयोगवियोगादि तावदिनेत्रपत्रादि सामापनादिति = २ ठलव्यवह्रहास्वयं ते दारुणाय दर्पितयाय

प्रवयवयस्वपदरूमनानवलवक्षमायाविशुद्धि = १

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रतिविरहव्यंग्यं
नसमप्रीतेन्नारा
नेपियदर्शनविरह
लनतलसहलवत
वलनावः
रताश्रुकुंचमादःको
वेतुर्युनतिमनाक्रांत
पादिलासुतमनेत
वहुरुदयसभगमग्र
कासीं गुरुदिवसमत
नवयुवागलनबृकराव
तेनवपतिमहिलासह
स्तिभरवनमानेवुलंगनेन
केलहेहवदयन

नायकस्यहृदयकृति
तुवाय
न्निपत्नीतिरस्केनवाच
मितिरूपः
र्यकारितेनवाच्यपत्र
अतेतिमगतलाभयो
लयः = ९

नाहालिंगनसमये
दृढैव चेत्तेनेतुलमा
सरीति परीक्षितं
नःपतिरसवंधनेस्त्वरह
इयान = २

सरलाधवनसाध
मार्गसुकरजारसरु
नेलवनपाठवसं
त्वः नतलतलात्रे
त्वपतिविषयं
कोपनः
चैतः कुतः प्रवृत्ति
नायकः तिकानकि
नतेत्रवेपदायाभावः
जगनिहीवा
तुमुत्रकाः
परिवलसुद्वहतं
पावसत्कनवनभवा
संसलयतमनः=

सर्वमसम सालाय
भगःवदवः सहृदयः
मे अर्पा क
वपदकमवकाशु जवाप्ति

कारकवांत
नवकतेन
त्पाभावनः

नासा

काश्यते ।। यथा वा ।। मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि ।। सख्यैवं
प्रतिबोधिता प्रतिवचस्तामाह भीतानना नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति ।। अत्र भीतानने त्यनेन नीचैः २
शंसनस्य युक्तता गम्यते ।। भावादीनां पदप्रकाशत्वे दधिकं न वैचित्र्यमिति न तदुदाह्रियते ।। रुधिरविसरप्रसाधितकरालक
रवालरुचिरभुजभ्यो रिवः ।। झटिति भ्रुकुटिविटङ्कितललाटपट्टो विभासि नृपभीमः ।। ।। अत्र भीमपदस्य भीमत्वमाने
मुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः ।। कस्य नानन्दनिस्यन्दं विदधाति सदागमः ।। ।। काचित्संकेतदायिनमेवं मु
ख्यया वृत्त्याऽऽह सायं स्नानमुपासितं मलयजेनाङ्गं समालेपितं यातोऽस्ताचलमौलिमम्बरमणिर्विस्रब्धमत्रागतिः ।। अत्यर्थं नवसौकुमार्यसमु
मितालोत्तालियेनाधुना नैवं दृष्टनिमीलनव्यतिकरं शक्नोमि तेनासितुम् ।। १ ।। अत्र वस्तुना वक्तृपुरुषवदिति ययालाक्तोऽसीति वस्तुध्व
नापदद्योत्यं व्यज्यते तदप्राप्तिमहादुःखविलीनाशेषपातका ।। तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा ।। १ ।। चिन्तयन्ती जगत्सू
तिं परब्रह्मस्वरूपिणम् । निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका ।। अत्र जन्मसहस्रैरुपभोगेन क्षय्यं निःशेषं फलानि विधे
यानि दुःखचिन्ताह्लादाभ्यामनुभूतानीत्युक्तं एवं चाशेषचयपदद्योत्यमितिरायोक्तिः ।। क्षणदासावक्षणदा वनमवनं व्य
सनमव्यसनं ।। वत वीरतव द्विषतां पराङ्मुखे त्वयि पराङ्मुखं सर्वं ।। १ ।। अत्र शब्दशक्तिमूलविरोधाङ्गेनोपमानेन ध्वनिविधिरपि
त्वामनुवर्तते ।। सर्वपदद्योत्यं वस्तु ।। तुहिनवत्लिहसंगौ सान्द्रप्रसिग्धरोमिलताणकमलदलौ ।। इन्दुरेणवदनाभासौ कुलकुण्डलगण्डमही
सूसुहः ।। १ ।। अत्र रूपकेण तथा त्वयास्यरुह मरुः परिचुम्बनं कनं ।। ये नतानन्यास्तिमिलल्लाप पदद्योत्यं काव्यलिङ्गमेष चरस्वः सम्भावी
वजकः शशिचन्दधवलालुलितयमपालिङ्गनजोचावं एकच्छत्रविभ्रमकुसुमप्रभृतरञ्जविभ्रमतो ।। १ ।। अत्र वस्तुनायेवं कामि
नामहोत्सवः जासमस्ता सुग्धदचिनदादेशायरामुखइतिजाग्रदिरूपमाणावदेवनेतिरुपातिवाच्यनइ तिभुवनरत्नपदद्योत्यंव
स्तुप्रकाशपक्षे निश्चितसार धियाप्ययन्नजो हरिणहशः स्ववलं वयस्यताले ।। दिशितियतालिय सौचैत्तच्च व्यतिकरमेत्य सभुनिवंस्य वस्याः ।। १ ।।
अत्र वस्तुना युगपदवस्थाः परस्परविरुद्धा अपि सम्बन्धीति व्यतिकरपदद्योत्यो विरोधः वारिजसौविषुणोसदावकप्राप्तिएणाहि
यथाहरव त्रस्तस्पृशां विशुद्धजाइलचलइसेखाति ।। १ ।। अत्र विशुद्धजातित्वलक्षणेन हेत्वलंकारेण हारो नवरमेकस्मान एवास्ते इति नच
लतीतिपदव्यङ्ग्यं वस्तु ।। सोऽसुद्धसामलगोधम्मिल्लोवलिगेललितमिप्रदेहो ।। नाएरवन्दाहिवलं गहि अमरी हरप्रसंगरे जप्रभूदं ।। १ ।। अत्र
रूपकेण मुकुराक पिणो तत्याकेशपाशः स्वनयोः प्रश्नः यथार्तनिविरताजयानिर्वृत्ता मिलामः वालुकोगरिति स्वमपदद्योत्या विभावना
एवं कविप्रौढोक्तिमात्रनिष्पन्नशरीरः स्ववपुस्सिमामिश्रवस्यसुहगप्रकोत्तसिमणा हमहसच्चे ।। कासो हरण सहग्गायपडाहरमुणि संतुहम
जा ।। अत्र वस्तुनामयी वान्यस्यामविभ्रयमरमस्त्वनतानि तिण वेत्यादि पत्तोसेत्यादिपदद्योत्यं वस्तु व्यज्यते ।। सङ्किप्रणविप्रहु वण्णसमर

नकेवलं सहचरभ्रमरवयस्येनापि हरेलसहालिङ्गनेनयोरपि पीडनं नाद्यपि भावः :: ४ ।। सम्पुष्पसमलाक्षो धम्मिल्लः कलितललितनिजदेहः तस्याः स्फटाइलं गृहीत्वा स्मरः त्वरतेसंगरे जयति ॥ ४
धम्मिल्ल स्मरइतिरूपकेण = १ कान्च हर्षे येन शोभातिशयतया दिश्यते :: २ नवमुग्धिमा समागमे सुखप्रमुग्धं कुरुत्व मिश्रणमम सुमन का सोभा स्वमप्रसरदो परजनीवृतवाद्य :: २
वक्रेति तद्वप्रजे परजनीचेष्टमायावंजकलेरुय... सम्भवात अतएव वरजोपितेना दिपदद्योत्यमिश्र नवपलजीमार्गति सूविग्रथा
फल स्तुपादिकः = १

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

का॰ ३॰ २ मिअंव पालीसहि एसिविडाए हवो एाविदिउ ओ क्खिअउ छेदं तोनदो कह वमिअं ॥१॥ अत्र वस्तुना हारच्छेदानन्तरमनुदेवरत्नमवस्थानं तत्

विलो॰ ४ कयवकी दृगितिव्यतिरेकः वाह्यं पदगम्यः पविसंतीघरवारं विवलिअवअणा णुलोइं मूलं एवहो ॥ खन्धा क्खित्तू एा घडं हात्ता एा ण्हो तिरसअत्

ति सहि कि क्खि ॥१॥ अत्र हेत्वलंकारेस सकेतनिकेतनं गच्छन्तं द्रष्टायदि न चगतं तु हि सितपरं घरं गच्छेत्वा न छेति वस्तु वित्रिंवद

व्यग्यम् ॥ यथावा ॥ विहलेखलं तु अं सहिदि द्रुण घडेण सरलं सरपिहिं ॥ कीर पुंस मिसेरणंमयाणु गुरु ओ तिया डिअ विभिन्ना ॥१॥ अत्र

नदीकूले लतागृहे नेकनस्संकेतमङ्गं गच्छेयतसरपश्चादागत उदूष्ठान्तं नदीगमनायदार घातव्या जेन बुद्धि पूर्वव्याकुलतया

घटः स्खलित इति मयोक्तितत लिमिनिनिस्थलितवि तसमीहि तसिद्धयेवु जो ॥ अहं तेस्य च निकटे सर्वसमयापेक्षित द्वारस्थावाजे नोत्र

वकुत्यावस्तु जोएहेमकु रहेणा अविदुलितार सिओ अमणारावुहा विला वोठ तुपरवहू अहह हरइलुहिं गेअं ॥१॥ अत्र कान्वलिंगे

न वद्धापरवधूं वासानुडित्याऽभिलषसीति त्वदीयमाचरितं वस्तुन प्राकम्यमित्यातोयः परवस्तु पद प्रकाशः एकविंशतुर्थं

ठोक्तिमात्र निष्पन्न शरीरः वाक्यप्रकाशेपेमुप र्वस्तुदाहरणं सत्रापी मथ प्रान्तयुग्मवस्तुपद प्रकाशे नभवतीति पंचत्रिंशद्भेदाः प्रबंधेप्यर्थ

शक्तिमूः ॥ यथा ॥ गृध्रगोमायुसंवादादौ तथाच ॥ अलस्मिश्मशाने सिन्ग धृगोमायुसंकुले कंकालबहुले घोरे सर्वप्राणिभयंकरे ॥१॥

नचेह जीवितः कश्चित्कालधर्ममुपागतः प्रियो वाप्यदि वा देष्यः प्राणिनां गतिरीदृशी ॥२॥ इति दिवा प्रभवतोगृध्रस्य पुरुषविस

र्जनपरमिदं वचनम् ॥ आदित्योयं स्थितो मूढाः स्नेहं कुरुत सांप्रतम् बहुविघ्नो मुहूर्तोयं जीवेदपि कदाचन ॥ अमुं कनकवर्णाभं बालम

प्राप्तयौवनम् गृध्रवाक्यात्कथं मूर्खास्त्यजध्वमविशंकिताः ॥२॥ इति निशिविजृंभमाणस्य गोमायोर्जनविवर्तननिष्ठं चेति प्रबन्धएवप्रथ

ते । अन्ये त्वेकादशभेदाग्रन्थविस्तरभयान्नोदाहृताः । स्वयत्नलक्ष्यान्नुसर्तव्याः ॥ अपि शब्दात्पदवाक्ययोः पदैकदेशरचनावर्णेष्वपि रसा

दयः ॥ तेत्रप्रेक्षत्यायथा ॥ रइकेलिहिअणिअसणकरकिसलअरुद्धणअणजुअलस्स ॥ रुद्दस्स तइअणअणं पव्वइपरिचुंविअं जअइ ॥१॥

अत्र जयतीति नतु शोभत इत्यादि समानेपि हि स्थगनव्यापारे लोकोत्तरेणैव व्यापारेणास्यापिधानमिति देवीकृतमसमं यथावा ॥

प्रेयान्सायमपाकृतः सशपथं पादानतः कांतया द्वित्राण्येव पदानि वासभवनाद्यावन्नयात्युन्मनाः तावत्प्रत्युत पाणिसंपुटलसन्नीवीनि

बन्धं धृतो धावित्वैव कृतप्रणामकमहो प्रेम्णो विचित्रा गतिः ॥ अत्र पदानीति न तु द्वाराणि तिङ् सुपोर्यथा ॥ पथिपथिशुकचंचूचारुराभांकुराणां

दिशिदिशिपवमानो वीरुधां लासकश्च नरिनरि किरति द्राक्सायकान्पुष्पधन्वा पुरिपुरि विनिवृत्ता मानिनीमानचर्चा ॥१॥ अत्र किरतीति

किरन्सायका धन्वा न त्वे निवृत्तेति निवृत्ता नस्पष्टि कृत्वतिङ् सुवाचतत्रापि प्रत्ययेनातीतत्वं द्योत्यते यथावा ॥ लिखन्नास्ते भूमिं वहिरवनतः

प्राणदयितो निराहाराः सख्यः सततरुदितोच्छूननयनाः ॥ परित्यक्तं सर्वं हसितपठितं पंजरशुकैस्तवावस्था चेयं विसृज कठिने मान

मधुना ॥ अत्रालिखन्निति न तु लिखतीति तथास्ते इति न त्वासितइति अपि तु तवप्रसाद पर्यन्तमास्त इति भूमिमिति न भूमौ विति न हि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

बुद्धिपूर्वकं कं चिल्लिखतीति तिङः स्त्रिभक्तौ नाग्यपयम् संबंधस्य यथा ग्रामादि दमिग्रामं वसामि ग्राममुद्दिश्य ग्रामान्मि ग्रामादिग्रामाद्
द्वापि जाहोमि सोहोमि अत्रेनागरिकाणामिति षष्ठी। रमणीयः क्षत्रियकुमार आसीदिति कालस्य एवादि मात्रमाहेश्वर कार्मुके दाशरथि
प्रतिज्ञपितस्य भार्गवस्योक्तिः वचनस्य यथा तातांतातांतातान्नानापत्र ठाणातस्य पीनमस्य ॥तातामणि अत्रोकंक्त दसमि अजात्र अव मान
आद्यगुणप्रत्ययादीनावबुद्ध्ये प्रमाणैः कालेद्योत्यते पुरुषत्रयस्य यथा देहे च चललोचनाचितरुचे चेतः प्रमुच्य स्थिरप्रेमाणामहिमान
मेणानयनामालोक्य विलंत्वमि किमन्यविद्दिष्यमवतातामुचातदाशामि मामेषां कंठतटे कुतावलुण्ठितांसारवाहनिधौ अत्र प्रहासः
पूर्वनिपातस्य यथा येषां दोर्बलमेव दुर्बलतया ते संमतास्तैरपि प्रायः केवलनीतिरीतिशरणैः कार्यं किमुर्वीश्वरैः ये क्ष्मापाः कपुनः
पराक्रमनयस्वीकारकांतक्रमास्ते स्युर्नैवमवाद्गुणाद्विजगति द्वित्राः पवित्राः परं अत्र पराक्रमस्य प्राधान्यगम्यते विभक्तिविपर्ययस्य यथा
अधुना पुनरिंदीवरनयनं सितिमिपि कैरवोचितवद्विधमम् द्विषुमेलतनरपमवानयुउविपिषिद्धसाधवादपदम् अत्रेद्विवर्षेनत्वपूर्वसंगन्तीया
फलप्राप्तिर्द्योतयति भूयो भूयः सविधनगरी रथ्यया पर्यटंतं दृष्ट्वा दृष्ट्वा भवनवलभीतुंगवातायनस्था साक्षात्कामं नवमिव रतिर्मालती माधवं
यद्गाढोत्कंठालुलितललितैरंगकैस्ताम्यतीति अत्रानुकंपाक्तेः केनरूपतडितस्य प्रतिक्रिदातीतः सकलवचनामविषय पुनर्जे
न्मन्यस्मिन्ननुभवपथं योनगतवान् विवेकप्रध्वंसादुपचितमहामोहगहनो विकारः कोप्यंतर्जडयतिचतापं च कुरुते अत्रेषशब्द स्था
पत्तस्य कृतं वचनत्रीतिमन्यमनस्तयाकिमन्यद् दैवं निहतास्वनाहुषः नमामि तित्रि तिकिं ताव दप्रमानत्यावदायान्तु दयादिमोलितम्
अत्रैतुल्ययोगिताद्योतकस्य चइतिनिपातस्य गमोमोमुवनेषु विजेमाग्गोः प्रागः पुमिति दिपगमनप्रापविपर्ययाद्युदिपरं देवानजानातितम
वर्ष्मे पवित्र शान्तिमाप्यतिमहत्यर्जकवाणाहति क्रोणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः अत्रा गामितितिभुवने ष्वितिगुणो
ऽतिसर्वनामवचनप्रातिपदिकानां नत्वद्दितिनमद्दिति अपिचमदिति अस्य सर्वादेयतामाप्यविपर्ययाद्युदिति अन्यथा संपत्तिमु
त्वेनन्तत्वभावमुत्वेनाभिधानस्य तरुणिमनि कलयति कलामनुमदनधनुर्भ्रुवोः पठत्यग्रे अधिवसति सकलललनामौलि
मियंहरिणचलनयना अत्रैमनिजवन्यवीभावकमिनतावाणाम् तरुणत्वेपनुर्भ्रुवः समीपइतिमौलौ वसतीत्यत्वात् मिलत्वेष्व
बावाचकत्वेतिकश्चिन्नस्वरूपस्य विशेषोयः चमत्कारकारी स एवं वाचकत्वाप्नोति एवमन्यदपि बोध्यम् वर्णरचनानाम्यजकद्योग
त्वस्वरूपनिर्णये उदाहरिष्यते अपिशब्दात्प्रबंधेषु नाटकादिषु एवरसादीनां पूर्वं गणिता भेदास्य सदद्भुदाः भेदास्ते दे कापचाद्यातु ग
णिताः तेषां चान्योन्ययोजने संकरेणत्रिरूपेण संसृष्ट्या चैकरूपया नकेवलंशुद्धाएवैकपंचाशद्भेदाभवंति यावत्तेषां स्वप्रभेदैः
सृष्टा चेति चतुर्गुणत्वे वेदखाब्धिवियच्चंद्राः शरेषु युगखेन्दवः १०४०४ [illegible] ॥ सम

8

का०

[illegible]

नभृदिशामुन्मुदा क्रियते ॥ रवस्तापार्कशाम्यादेश्वर जाग्राएतत्कण्ठप्रकम्पितेमहिम्ना ॥ को इहयउ ओ हरवउ हीयइ रम्मि अहुलीजडुव
राई ॥ अत्रानुनयः किमुपभोगलक्षणेऽर्थान्तरे संक्रमितः किमनुरणनन्यायेनोपभोग एव व्यङ्ग्ये व्यञ्जकः इति संदेहः ॥ स्निग्धश्या
मलकान्तिलिप्तवियतो वेल्लद्बलाका घनाः वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः । कामं सन्तु दृढं कठोरहृदयो रामो
वनें भीरकाव्यैः परिचिताः कथमितरकाव्यवत्प्रसन्ना भवेत् यासामादित्यादिप्रभाणां मध्ये त्रिपथगा वहति ता
मेव परिचिताः कथं प्रसन्ना भवेतीति संदेहार्थः जगति जयिनस्ते ते भावा नवेंदुकलादयः प्रकृतिमधु
राः संत्येवान्ये मनो मदयंति ये ममतु यदियं याता लोके विलोचनचंद्रिका नयनविषयं जन्मन्येकः स एव महो
त्सवः १२ अत्र नवेंदुकलादयो ये प्रतिपक्षभूता याः स एव चंद्रिकात्वमन्यकर्षार्थमारोपयतीति व्याहतत्वम
वहतमनमनसि त्यादि अत्र ज्ञार्जुनार्जुनेति भवद्भिरिति चोक्ते सभीमकिरीटिनामिति किरीटिपदार्थः पुनरुक्तः
अस्त्रज्वालावलीढप्रतिबलजलधेरन्तर्वौर्वायमाने सेनानाथे स्थितेस्मिन्मम पितरि गुरौ सर्वधन्वीश्वरा
णां कर्णालं संभ्रमेण व्रज कृप समरं मुंच हार्दिक्य शंकां ताते चापद्वितीये वहति रणधुरं को भयस्यावा
काशः अत्र चतुर्थपदवाक्यार्थः भूपालरत्ननिर्दैन्यप्रदानप्रथितोत्सव विश्राणय तुरंगं मे मातंगं वा म
दालसम् १५ अत्र मातंगस्य प्राक् दैशोन्यायः स्वपिति यावदयं निकटे जनः स्वपिमि तावदहं किमपै
ति ते तदपि सांप्रतमाहर कूर्पं त्वदितं मुरुमर्दं चयं कुंचितामम् १६ एषो विदग्धः मात्सर्यमन्तर्यन्या

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

हि अत्रप्रकरणाद्यभावे संदेहः शांतशृंगारान्यतराभिधानेन तु निश्चयः गृहीतेयेनासीः परिभवभयान्नोचितम
का॰प्र॰ पि प्रभावाद्यस्माभ्नेव खलु नवकश्चिन्न विषयः पतित्यक्ते तेन त्वमसि सुतशोकान्न तु भयाद्विमोक्ष्ये शस्त्र त्वामहमपि
१९ यतः स्वस्ति भवते १७ अत्रशस्त्रमोचनहेतुर्नोपात्तः इदं ते केनोक्तं कथक कमलातंकवदने यदेतस्मिन्हेम्नः कटकमि
19 ति धत्से खल्वधियम् इदं तद्दुःसाध्याक्रमणपरमास्त्रं स्मृतिभुवा नव प्रीत्याचक्रे करकमलमूले विनिहितम् १८
अत्रकामस्यचक्रं लोके प्रसिद्धम् इह पथि मेरे गोदावर्याः पतित्यजतायगाः सरणीमपरो मार्गः तावद्दृष्टो हि विहेत्व
ताम् इहहि विहितो रक्ताशोकः कया पि हताशया चरणनलिनन्यासोदंचन्नवांकुरकंचुकः १९ पादाघातेनाशो
कस्य पुष्पोद्गमः कविप्रसिद्धः नोक्तो रोद्भवः स्मितनवसनालेकालायां कदाचन कौमुदीमहसि सुदृशि स्वैरं यां
त्यां गतोस्तमभूद्विधुः तदनु भवतः कीर्तिः केनाप्यगीयत येन सा प्रियगृहमगान्मुक्ताशंका क्व नासि शुभप्रदः २०
अत्रान्यतोपि कीर्तिर्ज्योत्स्नावत्प्रकाशरूपा कथिते ति लोकविरुद्धमपि कविप्रसिद्धेर्न दुष्टम् सदास्नात्वा निशीथि
न्यां सकलं वासरं बुधः नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च २१ ग्रहोपरागं विना रात्रौ स्नानं धर्मशास्त्रवि
रुद्धम् अनन्यसदृशं यस्य बलं बाह्वोः समीक्ष्यते षाड्गुण्यानुसृतिस्तस्य सत्यं सा निष्प्रयोजना २२ एतदर्थशा
स्त्रविरुद्धम् विधाय दूरे केयूरमनंगागमनंगना बभार कांते न रतौ करजोल्लेखमालिकाम् २३ केयूरपदेन खड्ग १९
नेन विहितम् अत्रांगया ग्यागपरिशीलनकीलनेन दुस्साय सिद्धिस वियंविदयदिहूरे आसादयन्त्विममतामपु

नाविवेकख्यातिंसमाधियतनेमोलिमणिर्विमुक्तः २४ विवेकख्यातिःसंप्रज्ञातोपयोगः पश्चादसंप्रज्ञातःततोमुक्तिः
ननुविवेकख्यातौ एवंविधोत्तरे पिविकदुग्धदाहार्थम् प्राप्ताःश्रियःसकलकामदुघस्ततःकिंदत्तंपदंशिरसिवि
द्विषतांततःकिम् संतर्पिताःप्रणयिनोविभवैस्ततःकिंकल्पंस्थितंतनुभृतांतनुभिस्ततःकिम् २५ अत्रततःकि
मितिननवीकृतम् ननुयथा यदिदहत्यनलोत्रकिमद्भुतंयदिचगौरवमद्रिषुकिंततः लवणमंबुसदैवमहो
दधेःप्रकृतिरेवसतामविषादिता २६ यत्रानुल्लिखितार्थमेवनिखिलंनिर्माणमेतद्विधेरुत्कर्षप्रतियोगिकल्प
नमपिन्यक्कारकोटिःपरा याताःप्राणभृतांमनोरथगतीरुल्लंघ्ययत्संपदस्तस्याभासमणीकृताश्मसुमणेरश्मा
त्वमेवोचितम् २७ अत्रछायामात्रमणीकृताश्मसुमणेस्तस्याश्मतैवोचितेतिसनियमत्ववाच्यम् छायामात्रे
तिमात्रशब्दस्यैवकारेणवाच्यकरणात्तनियमत्वंमात्रशब्दस्यएवकारेणगतत्वान्नियमकृत् वक्त्रांभोजंसरस्वत्य
धिवसतिसदाशोणएवाधरस्तेबाहुःकाकुत्स्थवीर्यस्मृतिकरणपटुर्दक्षिणस्तेसमुद्रः वाहिन्यःपार्श्वमेताःक्ष
णमपिभवतोनैवमुंचंत्यभीक्ष्णंस्वच्छेंतर्मानसेस्मिन्कथमवनिपतेतेंबुपानाभिलाषः २८ अत्रशोणएवेतिनि
यमोनवाच्यः श्यामांश्यामलिमानमानयतभोःसांद्रैर्मषीकूर्चकैर्मंत्रंतंत्रमथप्रयुज्यहरतश्वेतोत्पलानांश्रि
तम् चंद्रंचूर्णयतक्षणाच्चकणशःकृत्वाशिलापट्टकेयेनद्रष्टुमहंक्षमोदशदिशस्तद्वक्रमुद्रांकिताः २९ अ
त्रैणाक्षीमितिनिश्यामांविशेषोवाच्यः कल्लोलवेल्लितदृषत्परुषप्रहारैरत्नान्यमूनिमकराकरमावमंस्थाः ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

का॰प्र॰
२॰
20

किं कौस्तुभेन विहितो भवतो न नाम याञ्चाप्रसारितकरः पुरुषोत्तमोपि ३० अत्र एकेन किं न विहितो भवतो न नामे
ति सामान्ये वाच्यम् अर्थित्वे प्रकटीकृतेपि न फलप्राप्तिः प्रभोः प्रत्युत द्रुह्यन् दाशरथिर्विरुद्धचरितो युक्तस्तया क
न्यया उत्कर्षं च परस्य मानयशसोर्विस्रंसनं चात्मनः स्त्रीरत्नं च जगत्पतिर्दशमुखो देवः कथं मृष्यते ३१ अत्र
स्त्रीरत्नमुपेक्षितुमित्याकांक्षति नहि परस्येत्यनेन संबंधो योग्यः आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि
चक्षुर्नवं भक्तिर्भूतपतौ पिनाकिनि पदं लंकेति दिव्या पुरी उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते स्याच्चे
देष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः ३२ अत्र स्याच्चेदेष न रावण इत्यत एव समाप्यम् अनेन बुद्धिर्व्यसनेन मूर्च्छि
ता मदेन नारी सलिलेन निम्नगा निशा शशांकेन धृतिः समाधिना नयेन चालंक्रियते नरेंद्रता अत्र श्रुतादिभिरु
त्कृष्टैः सह व्यसनमदवनितयोर्निकृष्टयोर्भिन्नत्वम् लक्ष्मीं वा गेत्यत्र विदितेनैते त्वित्येन क्षीरात्तस्मादपसरनीति ३॰
विरुद्धं प्रकाश्यते प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशामकेशवमपाण्डवं भुवनमद्य निःसोमकम् इयं
परिसमाप्यते रणकथाद्य दोःशालिनामपैतु रिपुकाननातिगुरुरद्य भारो भुवः ३३ अत्र शयितः प्रयत्नेन बो
ध्यस इति विधेयम् यथा वा वाताहारतया जगद्विषधरैराश्वास्य निःशेषितं ते ग्रस्ताः पुनरभ्रतोयकणिका
तीव्रव्रतैर्बर्हिभिः तेपि क्रूरचमूरुचर्मवसनैर्नीताः क्षयं लुब्धकैर्दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणा २॰
नीहते ३४ अत्र वाताहारादित्रये व्युत्क्रमेण वाच्यम् अत्रैवाभासमानस्तामरसाभमलक्षोणीशयशःस्मरक्रीडोत्क्षा
ब्रूं.डा

मन विरहिप्राणादमन स्मरोहं सोत्रेसप्रबलदल नीलोत्पलमरवेंसखेदोहं मोहंस्माथयकथयवैकोऽव
दना अत्रविरहिप्राणादमनेति नाम्नैवायम् लग्रराणामाहृतं गेयेत्यादौ अत्र विदितेते क्लिलुपसंहृतोऽपि तेने।
त्यादिनापुनरु पात्तः हृतमेव प्रहृतमपत्तत्त्रस्यविवेरेषिणः यथाश्रुज्जायते पातोनतथापुनरुक्तनितिः ३६
अत्र पुंव्यंजनस्यापि प्रतीताः यत्रैकोदोषः प्रदर्शितस्तत्र दोषांतराण्यपि संति तथापि तेषां तत्राप्रकृतत्वान्न
काथानेनकृतम् ५१ ५२ ५३ ५४ ५५ ५६ ॥ कर्णावतंसादिपदे कर्णादिध्वनिनिर्मितिः संनिधानादिबोधा
र्थम् अवतंसादीनि कर्णाद्याभरणान्येवाच्यंते तत्रकर्णादिशब्दाः कर्णादिस्थितिप्रतिपत्तये यथा अस्याः
कर्णावतंसेन जितं सर्वं विभूषणम् तथैव शोभतेऽत्यंतमस्याः श्रवणकुंडलम् ३७ अपूर्वमधुरामोदप्रमोदि
तदिशस्ततः आयद्बुर्भृंगमुखराः शिरःशेखरशालिनः ३८ अत्रकर्णश्रवणशिरःशब्दाः सन्निधानप्रतीत्य
र्थम् विदीर्णाभिमुखारातिकरालेसंगरांतरे धनुर्ज्याकिणचिह्नेन दोष्णा विस्फुरितं तव ३९ अत्र धनुः
शब्दः ज्याविद्धत्वावगतये अन्यत्र ज्यावेधनिःस्यंदभुजेन यस्य विनिःश्वसद्वक्त्रपरंपरेण कारागृहे निर्जि
तवासवेन दशाननेनोषितमा प्रसादात् ४० इति केवलो ज्याशब्दः प्रोतोऽम्बरपरिधेयाविभ्रमप्रतिपत्तिभिः।
मुक्ताहारेणलसता हसतीव स्तनद्वयम् ४१ अत्र मुक्तानामन्यरत्नामिश्रत्वबोधनाय मुक्ताशब्दः सौंदर्यसं
पन्नाकरांय यस्यास्तेते च विभ्रमाः षट्पदा पुष्पमालेव कान्ताकर्षति सा सखे ४२ अत्रोत्कृष्टपुष्पधियेपुष्पश

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

द्वौ। निरुपपदो हि मालाशब्दः पुष्पस्रजमेवाभिधत्ते स्थितेष्वेतत्समर्थनम् न खलु कर्णावतंसादिवज्जघनकाञ्ची
त्यादि क्रियते जगाद मधुरं वाचं विशदाक्षरशालिनीमित्यादौ क्रियाविशेषणत्वेऽपि विवक्षितार्थप्रतीतिसिद्धौ ग
का॰प्र॰ तार्थस्यापि विशेष्यस्य विशेषणदानार्थं प्रयोगः कार्य इति न युक्तमुक्तम् युक्तत्वेन वा चरणत्रपरित्राणरहिता
२१ भ्यामपि द्रुतं पदाभ्यां दूरमध्वानं व्रजन्नेष न खिद्यते ५३ इत्याद्युदाहार्यम् ख्यातेऽर्थे निर्हेतोरदुष्टता यथा च
21 न्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम् उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप
लक्ष्मीः ५४ अत्र रात्रौ पद्मस्य संकोचो दिवा चन्द्रस्य निष्प्रभत्वं लोकप्रसिद्धमिति न भुङ्क्ते इति हेतुं नापेक्षते अ
नुकरणे तु सर्वेषाम् श्रुतिकटुप्रभृतीनां दोषाणां यथा मृगचक्षुषमद्राक्षीदित्यादि कथयत्ययम् पश्यैष
च गवित्याह सुत्रामाणं यजेति च ५५ वक्त्राद्यौचित्यवशाद्दोषोऽपि गुणः क्वचित् क्वचिन्नोभौ वक्तृप्रतिपाद्य
व्यङ्ग्यवाच्यप्रकरणादीनां महिम्ना क्वचिद्दोषोऽपि गुणः क्वचिन्न दोषो न गुणः तत्र वैयाकरणादौ वक्तरि
प्रतिपाद्ये वा रौद्रादौ रसे च व्यङ्ग्ये कष्टत्वं गुणः क्रमेणोदाहरणम् दीधीङ्वेवीङ्समः कश्चिद्गुणवृद्ध्योरभाज
नम् क्विप्प्रत्ययनिभः कश्चिद्यत्र सन्निहिते न ते ५६ यदा त्वामहमद्राक्षं पदविद्याविशारदम् उपाध्यायं त
दास्मार्षं समस्प्राक्षं च संमदम् ५७ अत्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कणप्रायप्रेङ्खितभूरिभूषण २१
रवैराघोषयन्त्यम्बरम् पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्व्यालोलस्तनभारभैरववपुर्दर्पोद्धते

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यावति ५८ वाच्यवशात् यथा मातंगाः किमनुवल्गितैः किमफलैर्वाडंभरैर्जंबुकाः सारंगा महिषा मदं भजन किं
शून्येष्वशूरा न के कोपाटोपसमुद्भटोत्कटसटाकोटेरिभारेः शनैः सिंधुध्वानिनि हुंकृते स्फुरति यत्तद्गर्जितं गर्जि
तम् ५९ अत्र सिंहो वाच्यः परुषाः शब्दाः प्रकरणवशाद्यथा रक्ताशोककृशोदरी क्व नु गता त्यक्त्वानुरक्तं जनं नो
दृष्टेति मुधैव चालयसि किं वाताभिभूतं शिरः उत्कंठाघटमानषट्पदघटासंघट्टदष्टच्छदस्तत्पादाहतिमंतरे
ण भवतः पुष्पोद्गमोयं कुतः ६० अत्र शिरोधूननेन नक्षोपितस्याशिरस्ति क्वचिन्नीरसे न गुणो न दोषः यथा शीर्ण
घ्राणांघ्रिपाणीन्व्रणिभिरपघनैर्घर्घराव्यक्तघोषान्दीर्घाघ्रातानघौघैः पुनरिव घटयत्येकउल्लाघयन्यः ।
घर्मांशोस्तस्य वोंतर्द्विगुणघनघृणानिघ्ननिर्विघ्नवृत्तेर्दत्तार्घाः सिद्धसंघैर्विदधतु घृणयः शीघ्रमंहोविघातम्
अप्रयुक्तनिहतार्थौ श्लेषादौ न दुष्टौ यथा येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो यश्चोद्वृत्तभुजं
गहारवलयो गंगां च योधारयत् यस्याहुः शशिमच्छिरो हर इति स्तुत्यं च नामामराः पायात्स स्वयमंधकक्षयक
रस्त्वां सर्वदो माधवः ६२ अत्र माधवपदे शशिमदंधकक्षयकरशब्दावप्रयुक्तनिहतार्थौ अश्लीलं क्वचि
द्गुणाः यथा सुरतारंभगोष्ठ्यामश्लीलैः पदैः पिशुनयेच्च रहस्य वस्तु वक्तीति काख्यस्थितौ करिहस्तेन संबाधप्रवि
ष्टांतर्विलोडिते उपसर्पन्ध्वजः पुंसः साधनान्तर्विराजते ६३ ग्रामकथासु उत्तानोच्छूनमंडूकपाटितोदर
सन्निभे क्लेदिनि स्त्रीव्रणे सक्तिरक्रिमेः कस्य जायते ६४ निर्वाणवैरदहनाः प्रशमादरीणां नंदंतु पांडुतनयाः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

का॰ प्र॰ सहमाधवेन रक्तप्रसादिनभुवःस्तनविग्रहाग्रुस्तस्याभवंस्तकरराजस्तनाःसमन्ततः ५५ अत्रभाव्यमंगलसूचनम्।
संदिग्धमपिवाच्यमहिम्नाक्वचिन्नियतार्थप्रतिपत्तिहेतुत्वेव्याजस्तुतिपर्यवसायित्वेगुणः यथा पृथुकार्तस्वरपात्रं
भूषितनिःशेषपरिजनंदेव विलसत्करेणुगहनंसंप्रतिसममावयोःसदनम् ५६ प्रतिपाद्यप्रतिपादकयोर्झटिते
२२ सत्यप्रतीतोगुणः यथा आत्मारामाविहितरतयोनिर्विकल्पेसमाधौज्ञानोत्सेकाद्विघटिततमोग्रंथयस्सत्वनि।
ष्ठाः यंवीक्षन्तेकमपितमसांज्योतिषांवापरस्तात्तंमोहांधःकथमयममुंवेत्तिदेवंपुराणम् ५७ स्वयंवापरामर्शेय
था षट्त्रिंशकदशनाडीचक्रमध्यस्थितात्माहृदिविनिहितरूपःसिद्धिदस्तद्विदांयः अविचलितमनोभिःसाध।
कैर्मृग्यमाणःसजयतिपरिणद्धःशक्तिभिःशक्तिनाथः ५८ अयमपरःश्लोकःप्रथमप्रयोगोगुणः यथा कुल्लाकरैक
मलकुरस्तस्मैवर्द्धति जेसिदुवारविडुवामहवल्लहादे जगालिदस्समहिमीदहिरोणसरिच्छातिकिंचमहुविब्भहल
पव्वणापुंजाः ५९ अत्रकलमभक्तमहिषीदधिशब्दाग्राम्यात्रपिविदग्धकोक्तौ न्यस्तपदंक्वचिद्गुणः यथा गाढा
लिंगनवामनीकृतकुचप्रोद्भूतरोमोद्गमासांद्रस्नेहरसातिरेकविगलच्छ्रीमन्नितंबांबरा मामामानदमातिमा
मलमितिक्षामाक्षरोल्लापिनीसुप्ताकिंनुमृतानुकिंमनसिमेलीनाविलीनानुकिम् ६० क्वचिन्नगुणोनदोषो २२
यथा तिष्ठेत्कोपवशात्प्रभावपिहितादीर्घंनसाकुप्यति स्वर्गायोत्पतिताभवेन्मयिपुनःभावार्द्रमस्यामनः तांह
र्तुंविबुधद्विषोपिनचमेशक्ताःपुरोवर्तिनीसाचात्यंतमगोचरंनयनयोर्यातेतिकोयंविधिः ६१ अत्रापिहितेत्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तोऽनंतरं नैतद्युक्तमित्यत्रैतैर्न्यूनपदे विशेषबुद्धेरकरणान्न गुणः उक्तया प्रतिपत्तिः सर्वप्रतिपत्तिं बाधते इति न दोषः
अधिकं पदं क्वचिद्गुणः यथा यद्वंचनाहितमतिर्बहुचाटुगर्भं कार्योन्मुखः खलजनः कृतकं ब्रवीति तत्सा
धवो न न विदंति विदंति किंतु कर्तुं तथा प्रणयमस्य न पारयंति ९२ अत्र विदंतीति द्वितीयमन्ययोगव्यवच्छेदप
रम् अथवा वदवदजितः स शत्रुर्न हतो जल्पंश्च न वेत वासीतिचित्रं चित्रमरोदीद्धाहेति परं मृते पुत्रे इत्येव
मादो हर्षभयादिषुक्तेनैव कारि कथितं पदं गुणः लाटानुप्रासे कथितपदस्य गुणत्वं यथा सितकरेति सितक
रकररुचिरविभाविभाकराकारधरणीधरकीर्तिः पौरुषकमलाकमला सापि तवैवास्ति नान्यस्य ९३ ताला
जायंते गुणाजाला दे सहृदयैर्गृह्यंते रविकिरणानुगृहीतानि हंति कमलानि कमलानि ९४ जितेंद्रिय
त्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते गुणाधिके पुंसि जनोऽनुरज्यते जनानुरागप्रभवा हि संपदः
पतत्प्रकर्षमपि क्वचिद्गुणः यथोदाहृते प्रागप्राप्तेत्यादौ समाप्तपुनरात्तं क्वचिन्न दोषो न गुणः यत्र न वि
शेषणमात्रदानार्थं पुनर्ग्रहणमपि तु वाक्यांतरमेव क्रियते यथा त्रैव प्रागप्राप्तेत्यादौ अपदस्थसमासः क्व
चिद्गुणः यथोदाहृते रक्ताशोकेत्यादौ गर्भितं तत्रैव यथा हुमि अवहिअस्स रेहेहि णीरं कुणसु अहह विवेक
रहिअ ओ विस्मि विरो पि तव सि पुरो पत्तिअ भत्तिं सा पणउ सित्ति अत्र प्रतीतिमध्ये इदं प्रत्ययोत्पादनाय एव
मन्यदपि लक्ष्याद्गृह्यम् ९५ व्यभिचारिरसस्थायिभावानां शब्दवाच्यता कष्टकल्पनया व्यक्तिरनुभावा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

विभावयोः प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः अङ्गिनोऽननु
संधानं प्रकृतीनां विपर्ययः अर्थानौचित्यमन्यच्च दोषाः रसगता मताः स्वशब्दोपादानं व्यभिचारिणो यथा स
का॰प्र॰ व्रीडा दयितानने सकरुणा मातङ्गचर्माम्बरे सत्रासा भुजगे सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि सेर्ष्या जह्नुसुता
२३ वलोकनविधौ दीना कपालोदरे पार्वत्या नवसङ्गमप्रणयिनी दृष्टिः शिवायास्तु नः अत्र व्रीडादीनाम् व्या
23 नम्रा दयितानने मुकुलिता मातङ्गचर्माम्बरे सोत्कम्पा भुजगे निमेषरहिता चन्द्रेऽमृतस्यन्दिनि मीलद्भ्रूः सुर
सिन्धुदर्शनविधौ म्लाना कपालोदरे पार्वत्या नवसङ्गमप्रणयिनी दृष्टिः शिवायास्तु नः इत्यादि युक्तम् र
सस्य स्वशब्देन शृङ्गारादिशब्देन वा वाच्यत्वम् क्रमेणोदाहरणम् तामनङ्गजयमङ्गलश्रियं किंचिदु
च्चभुजमूललोकिताम् नेत्रयोः कृतवतोऽस्य गोचरे कोऽप्यजायत रसो निरन्तरः १९ आलोक्य कोम
लकपोलतलाभिषिक्तव्यक्तानुरागसुभगामभिराममूर्तिम् पश्यैष बाल्यमतिवृत्य विवर्तमानः शृ
ङ्गारसीमनि तरङ्गितमातनोति २० स्थायिनो यथा संप्रहारे प्रहरणैः प्रहाराणां परस्परम् ठणत्का
रैः श्रुतिगतैरुत्साहस्तस्य कोऽप्यभूत् २१ अत्रोत्साहस्य कर्पूरधूलिधवलद्युतिपूरधौतदिङ्मण्डले शि २३
शिररोचिषि तस्य यूनः लीलाशिरोंऽशुकनिवेशविशेषक्लृप्तिव्यक्तस्तनोन्नतिरभून्नयनावनौ सा २२
अत्रोद्दीपनालम्बनरूपाः शृङ्गारयोग्या विभावा अनुभावपर्यवसायिनः स्थिता इति कष्टकल्पना प

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

विहरति रतिं मतिं लुनीते स्खलति तनोः परिवर्त्तते च भूयः इति बत विषमा दशास्य देहं परिभवति प्रसभं किमत्र कुर्मः २३
अत्र रतिहासादीनामनुभावानां करुणादावपि संभवात्कामिनीरूपो विभावो यत्नप्रतिपाद्यः प्रसादे वर्त्तस्व प्रकट
य मुदं संत्यज रुषं प्रिये शुष्यंत्यंगान्यमृतमिव ते सिंचतु वचः निदानं सौख्यानां क्षणमभिमुखं स्थापय मुखं न
मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः २४ अत्र शृंगारे प्रतिकूलस्य शान्तस्यानित्यताप्रकाशनरूपो विभावस्त
त्प्रकाशितश्च निर्वेदो व्यभिचारी उपात्तः णाऊअरमणोम्मिलोअणावहस्सिअपडिपक्खणामज्झसि सहलप
रिहारह्मि अस्सावणागमणं चेअ सहोइ बहू २५ अत्र सकलपरिहारवनगमने शान्तानुभावौ इंधनाद्यानय
नव्याजेनोपभोगार्थं वनगमने च न दोषः दीप्तिः पुनः पुनः यथा कुमारसंभवे रतिप्रलापेषु अकाण्डे प्रथनं य
था वेणीसंहारे द्वितीयेऽङ्के अनेकसंहत्ये प्रवृत्ते भानुमत्या सह दुर्योधनस्य शृंगारवर्णने छेदो यथा वीरचरि
ते द्वितीयेऽङ्के राघवभार्गवयोर्धाराधिरूढे वीररसे कंकणमोचनाय गच्छामीति राघवस्योक्तौ अंगस्याप्रधान
स्याति विस्तरेणावर्णनं यथा हयग्रीववधे हयग्रीवस्य अंगिनोऽननुसंधानं यथा रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्याग
मने सागरिकाया विस्मृतिः प्रकृतयो दिव्या अदिव्या दिव्यादिव्याश्च वीररौद्रशृंगारशान्तरसप्रधानाः धीरोदा
त्तधीरोद्धतधीरललितधीरप्रशान्ताः उत्तमाधममध्यमाश्च तत्र रतिहासशोकाद्भुतान्यदिव्योत्तमप्रकृतिवद्दि
व्येष्वपि किं तु संभोगशृंगाररूपा उत्तमदेवताविषया न वर्णनीयाः तद्वर्णनं पित्रोः संभोगवर्णनमिवात्यन्तमनुचि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नम् क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार इ
का॰प्र॰ त्युक्तवद्भ्रुकुट्यादिविकारवर्जितः सद्यः फलदः क्रोधः स्वःपातालगमनसमुद्रोल्लङ्घनाद्युत्साहश्च दिव्येष्वे
२७ व अदिव्येषु तु यावदवदानं प्रसिद्धमुचितं वा तावदेवोपनिबद्धव्यम् अधिकं तु वर्ण्यमानमसत्यप्रतिभास
24 नेन नायकवद्वर्तितव्यं न प्रतिनायकवदित्युपदेशे न पर्यवस्येत् दिव्यादिव्येषु उभयथा एवमुक्तस्यौचित्य
स्य दिव्यादीनामिव धीरोदात्तादीनामन्यथावर्णने विपर्ययः तत्रभवन्भगवन्नित्युत्तमेन नाधमेन मुनिप्रभृ
तौ न राजादौ भट्टारकेति राजादौ परमेश्वरेति न मुनिप्रभृतौ प्रकृतिविपर्ययापत्तेर्वाच्यम् एवं देशका
लवयोजात्यादीनां देशव्यवहारादिकमुचितमेवोपनिबद्धव्यम् अनङ्गस्य रसानुपकारकस्य वर्णनं यथा
कर्पूरमञ्जर्यां नायिकया स्वात्मना च वसन्तस्य वर्णनमनादृत्य बन्दिवर्णितस्य राज्ञः प्रशंसनम् ईदृशा
इति नायिकापादप्रहारादिना नायककोपादिवर्णनम् उक्तं हि ध्वनिकृता अनौचित्यादृते नान्यद्रसभङ्गा
स्य कारणम् प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा इति ५८ ५९ ६० ६१ इदानीं क्वचिद्दोषा अप्येते इत्युच्यते
न दोषः स्वपदेनोक्तावपि सञ्चारिणः क्वचित् यथा औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया तैस्तैर्बन्धुवधू २८
जनस्य वचनैर्नीताभिमुख्यं पुनः दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे सङ्गमे संरोहत्पुलका हरेण हसता श्लि
ष्टा शिवायास्तु नः ६२ अत्रौत्सुक्यशब्दवत् तदनुभावो न तथा प्रतीतिकृत् अतएव दूराकृष्टकमित्यादौ व्रीडाद्यन

भावानां विलीनत्वादीनामिवोत्कटत्वान्नुभावस्य हसाप्रसारणादिरूपस्य तथाप्रतिपत्तिकारित्वाभावादुत्सुक
मितिहतम् संचार्यादेर्विरुद्धस्य बाध्यस्योक्तिर्गुणावहा बाध्यत्वेनोक्तिर्न परं दोषः यावत्प्रकृतरसपरिपोष
कृत् यथा क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सेत्यादौ अत्र वितर्कादिषु गतेष्वपि चिन्ताया
मेव विश्रान्तिरिति प्रकृतरसपरिपोषः पाण्डुक्षाममेव वदनं हृदयं सरसं तवालसं च वपुः आवेदयति नितान्तं क्षे
त्रियरोगं सखि हृदन्तः १७ इत्यादौ तायारसात्वं पाण्डुतादीनामिति न विरुद्धत्वम् सत्यं मनोरमा रामाः सत्यं रम्या
विभूतयः किन्तु मत्ताङ्गनापाङ्गभङ्गलोलं हि जीवितम् १८ मित्यत्राद्यमर्धं बाध्यत्वेनैवोपात्तम् जीवितादप्यपाङ्ग
भङ्गस्याधिकमस्थिरत्वमिति प्रसिद्धं तद्रूपोपमानतयोपात्तं शान्तमेव पुष्णाति न पुनः शृङ्गारस्यात्र प्रतीतिः तदो
गाप्रतिपत्तेः नह्वविनाभावयोरस्वीकरणामत्रपरिहारः शान्तशृङ्गारयोर्नैरन्तर्यस्याभावात् ६२ काव्यशोभाक
रो रसान्तरादन्यप्राममात्राज्ञा तथाभावात् आश्रयैक्ये विरुद्धो यः स कार्यो भिन्नसंश्रयः रसान्तरेणान्तरितो
नैरन्तर्येण यो रसः वीरभयानकयोरेकाश्रयत्वेन विरोध इति प्रतिपक्षगतत्वेन भयानको निवेशयितव्यः शान्तशृ
ङ्गारयोस्तु नैरन्तर्येण विरोध इति रसान्तरमन्तरे कार्यम् यथा नागानन्दे शान्तस्य जीमूतवाहनस्याहो गीतमहो वा
दित्रमित्यद्भुतमन्तर्निवेश्य मलयवतीं प्रति शृङ्गारो निबद्धः न परं प्रबन्धे यावदेकस्मिन्नपि वाक्ये रसान्तरव्यवधा
नाद्विरोधो निवर्तते यथा भूरेणुदिग्धान्नवपारिजातमालारजोवासितबाहुमध्याः गाढं शिवाभिः परिरम्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मारणान्त्रवरांगनाभिरभिहृष्टभुजोतवालाः सशोणितैःक्रव्यभुजांस्फुरद्भिःपक्षैःखगानामुपवीज्यमानान् संवी।
जितांश्चंदनवारिसेकैःसुगंधिभिःकल्पलतादुकूलैः विमानपर्यंकतलेनिषण्णाःकुतूहलाविष्टतयातदानीम्
का०प्र० निर्दिश्यमानांल्ललनांगुलीभिर्वीराःस्वदेहान्पतितानपश्यन् अत्रबीभत्सशृंगारयोरंतर्वीररसोनिवेशितः६३
२५ स्मर्यमाणोविरुद्धोपिसाम्येनाथविवक्षितः अंगिन्यंगत्वमाप्तौयौतौनदुष्टौपरस्परम् अयंसरशनोत्कर्षीपी
नस्तनविमर्दनः नाभ्यूरुजघनस्पर्शीनीवीविस्रंसनःकरः एतद्भूरिश्रवसःसमरभुविपतितंहस्तमवलोक्य
तद्वधूरभिदधे अत्रपूर्वावस्थास्मरणंशृंगारांगमपिकरुणंपरिपोषयति दंतक्षतानिकरजैश्चविपाटिता।
निप्रोद्भिन्नसांद्रपुलकेभवतःशरीरे दत्तानिरक्तमनसामृगराजवध्वाजातस्पृहैर्मुनिभिरप्यवलोकितानि।
अत्रकामुकस्ययथा दंतक्षतादीनिचमत्कारकारणानितथाजिनस्य यथाच परःशृंगारीतदवलोकनादेव
तत्सहृदयहृदेतादृशामनुनयइतिसाम्यविवक्षा क्रामंत्यःक्षतकोमलांगुलिगलद्रक्तैःसदर्भाःस्थलीःपादैःपा
तितयावकैरिवपतद्बाष्पाम्बुधौताननाः भीताभर्तृकरावलंबितकरास्त्वद्वैरिनार्योधुनादावाग्निंपरितोभ्रमंति
पुनरप्युद्यद्विवाहाइव ८० अत्रचाटुकेराजविषयारतिर्याप्रतीयते तत्रकरुणाइवशृंगारोप्यंगमितितयोर्न २५
विरोधः यथा एहिगच्छपतोत्तिष्ठवदमौनंसमाचर एवमाशाग्रहग्रस्तैःक्रीडंतियनिनोर्थिभिः ८१ इत्यत्रैही
तिक्रीडंतिगच्छेतिक्रीडंतिइतिक्रीडनायेत्तयोरागमनगमनक्रिययोर्नविरोधः क्षिप्तोहस्तावलग्नःप्रसभम

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

भिहतोप्याददानोंशुकांतंगृह्णन्केशेष्वपास्तश्चरणनिपतितोनेक्षितःसंभ्रमेणालिंगन्योवधूतस्त्रिपुरयुवति
भिःसाश्रुनेत्रोत्पलाभिःकामीवार्द्रापराधःसदहतुदुरितंशांभवोवःशराग्निः ८२ इत्यत्रत्रिपुररिपुप्रभवातिश
यस्यकरुणोंगम् तस्यतुशृंगारः तथापिनकरुणोविश्रांतिरितितस्यांगत्वेनैव अथवा प्रागयथाकामुकस्याच
रितस्मिन्तथाप्यशराग्नेरितिशृंगारपोषिणेनकरुणोनमुख्यएवार्थउपोद्बलयते उक्तंहि गुणाःकृतात्मसंस्काराः
प्रधानंप्रतिपद्यते प्रधानस्योपकारेहितथाभूयसिवर्तते इति प्राक्प्रतिपादितरूपस्यरसस्यरसांतरेणानविरो
धेनाप्यंगांगिभावोभवतीतिरसशब्देनात्रतत्स्थायिभावउपलक्ष्यते ६५॥ इतिश्रीकाव्यप्रकाशेदोषप्रकाशव
र्णनंनामसप्तमउल्लासः॥७॥ एवंदोषानुक्त्वागुणालंकारविवेकमाह ये रसस्यांगिनोधर्माःशौर्यादयइ
वात्मनः उत्कर्षहेतवस्तेस्युरचलस्थितयोगुणाः आत्मनएवहिशौर्यादयोनाकारस्ययथातथारसस्यैवमाधुर्या
दयोनवर्णानाम् क्वचित्तुशौर्यादिसमुचितस्याकारमहत्त्वादेर्दर्शनादाकारएवास्यशूरइत्यादेर्व्यवहारादन्य
त्राशूरेपिविततकृतित्वमात्रेणशूरइतिक्वापिशूरेपिमूर्तिलाघवमात्रेणाशूरइत्यविश्रांतप्रतीतयोयथाव्यवह
रंति तद्वन्मधुरादिरसव्यंजकसौकुमार्यवर्णानांमाधुर्यादिव्यवहारप्रवृत्तेरमधुरादिरसांगानांवर्णानांसौकुमा
र्यादिमात्रेणमाधुर्यादिमधुरादिरसापकर्षणानांतेषामसौकुमार्यादेरमाधुर्यादिरसपर्यंतविश्रांतिप्रतीतिवं
व्यावहरंति अतएवमाधुर्यादयोरसधर्माःसमुचितैर्वर्णैर्व्यज्यंतेनतुवर्णाश्रयाःमात्रा यथैषांव्यंजकत्वंतथो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दाहरिष्यते उपकुर्वंति तं संतं येंगद्वारेण जातुचित् हारादिवदलंकारास्तेनुप्रासोपमादयः ये वाचकवाच्यलक्ष
णांगातिशयमुखेन मुख्यं रसं संभविनमुपकुर्वंति ते कंठाद्यंगानामुत्कर्षाधानद्वारेण शरीरिणोप्युपकारका
का॰प्र॰ हारादय इवालंकाराः यत्र तु नास्ति रसस्तत्रोक्तिवैचित्र्यमात्रपर्यवसिताः क्वचित्तु संतमपि नोपकुर्वंति अप
२६ सारय घनसारं कुरु हारं दूर एव किं कमलैः अलमलमालि मृणालैरिति वदति दिवानिशं बाला इत्यादौ वाचकमु
26 खेन मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं प्रमाथी निर्धूमो ज्वलति विधुतः पावक इव हिनस्ति प्रत्यंगं ज्वर
इव गरीयानित इतो न मां त्रातुं तातः प्रभवति न चांबा न भवतीत्यादौ वाच्यमुखेनालंकारौ रसमुपकुरुतः चित्ते वि
हट्टदि ण टुट्टदि सा गुणेसु सेज्जाइ लुट्टदि विसट्टदि दिम्मुहेसु बोलम्मि वट्टदि कब्बबंधे झाणे ण तुट्टदि चिरं तरु
णी तरट्टी इत्यादौ वाचकमेव मित्रे क्वापि गते सरोरुहवने बद्धानने ताम्यति क्रंदत्सु भ्रमरेषु वीक्ष्य दयितासन्नं
पुरः सारसम् चक्राह्वेन वियोगिना बिसलता नास्वादिता नोज्झिता कंठे केवलमर्गलेव निहिता जीवस्य निर्गच्छ
तः इत्यादौ वाच्यमेव न तु रसम् अत्र बिसलताजीवं रोद्धुं नालमिति प्रकृताननुगुणोपमा एष एव च गुणालंका
रप्रविभागः एवं च समवायवृत्त्या शौर्यादयः संयोगवृत्त्या तु हारादयः इत्यस्तु गुणालंकाराणां भेदः ओजःप्र
भृतीनामनुप्रासोपमादीनां चोभयेषामपि समवायवृत्त्या स्थितिरिति गड्डलिकाप्रवाहेनैषां भेद इत्यभिधानम २६
सत् यदप्युक्तं काव्यशोभायाः कर्तारो धर्मा गुणाः तदतिशयहेतवस्त्वलंकारा इति तदपि न युक्तम् यतः किं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

समस्तैर्गुणैः काव्यव्यवहारः उत कतिपयैः यदि समस्तैस्तत्कथमसमस्तगुणा गौडीया पांचाली च रीतिः काव्यस्यात्मा अ
थ कतिपयैस्तदद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः प्रोद्यन्नुल्लसत्येष धूम इत्यादावोजः प्रभृतिषु गुणेषु सत्सु काव्यव्यवहा
रप्राप्तिः स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनी अस्या रदच्छदरसो न्यक्करोतितरां सुधामित्यादौ विशेषोक्तिव्यतिरेकौ गु
णनिरपेक्षौ काव्यव्यवहारप्रवर्तकौ ६६ इदानीं गुणानां भेदमाह माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश एषां क्र
मेण लक्षणमाह आह्लादकत्वं माधुर्यं शृंगारे द्रुतिकारणम् शृंगारे अर्थात्संभोगे द्रुतिर्गलितत्वमिव श्रव्यत्वं पुनरो
जःप्रसादयोरपि ६७ करुणे विप्रलंभे तच्छान्ते चातिशयान्वितम् अत्यंतद्रुतिहेतुत्वात् दीप्त्यात्मविस्तृतेर्हेतुरो
जो वीररसस्थिति चित्तस्य विस्ताररूपदीप्तत्वजनकमोजः ६८ बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च वीराद्बी
भत्सं ततोपि रौद्रे सातिशयमोजः शुष्केंधनाग्निवत्स्वच्छजलवत्सहसैव यः व्याप्नोत्यन्यत्प्रसादोसौ सर्वत्र विहितस्थि
तिः अन्यदिति व्याप्नोतीह चित्तम् सर्वत्रेति सर्वेषु रसेषु सर्वासु रचनासु च गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्म
ता गुणवृत्त्या उपचारेण तेषां गुणानामाकारे शौर्यस्येव ६९ कुतस्त्रय एव न दशेत्याह केचिदंतर्भवंत्येषु दोषत्या
गात्परे श्रिताः अन्ये भजंति दोषत्वं कुत्रचिन्न ततो दश बहूनामपि पदानामेकपदवद्भासनात्मा यः श्लेषः यश्चा
रोहावरोहक्रमरूपः समाधिः या च विकटत्वलक्षणोदारता यश्चौजस्विमिश्रितशैथिल्यात्मा प्रसादस्तेषामो
जस्यन्तर्भावः पृथक्पदत्वरूपं माधुर्यं भंग्या साक्षादुपात्तम् प्रसादेनार्थव्यक्तिर्गृहीता मार्गाभेदरूपता समता क्व

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

का॰प्र॰ २९ 27

विशेषः तथाहि मातंगाः किमुवल्गितैरित्यादौतिरस्काराभिधानेनस्वमार्गत्यागोगुणः कष्टत्वग्राम्यत्वयोर्दुष्टताभि
धानान्निराकरणेनापारुष्यरूपसौकुमार्यमौज्ज्वल्यरूपाकांतिश्चस्वीकृता एवनेदशशब्दगुणाः पदार्थवाक्यरच
नावाक्यार्थेचपदाभिधा प्रौढिर्व्यासममासौचेतियाप्रौढिरोजइत्युक्तं तद्वैचित्र्यमात्रं नगुणाः तदभावेपिकाव्यव्य
वहारप्रवृत्तेः अपुष्टार्थत्वाधिकपदत्वानवीकृतत्वामंगलरूपाश्लीलग्राम्याणां निराकरणेन साभिप्रायत्वरूप
मोजोर्थनैर्मल्यात्माप्रसादउक्तिवैचित्र्यरूपंमाधुर्यमपारुष्यरूपंसौकुमार्यग्राम्यत्वरूपोदारताचस्वीकृतानि
अभिधास्यमानस्वभावोक्त्यलंकारेणरसध्वनिगुणीभूतव्यंग्याभ्यांचवस्तुस्वभावस्फुटत्वरूपार्थव्यक्तिःदीप्तरस
त्वरूपाकांतिश्चस्वीकृते क्रमकौटिल्यानुल्वणत्वोपपत्तियोगरूपघटनात्माश्लेषोविचित्रत्वमात्रम् अवैषम्यरू
पासमतादोषाभावमात्रंनपुनर्गुणाः कःखल्वनुन्मत्तोन्यप्रस्तावेन्यदभिदध्यात् अर्थस्यायोनेरन्यछायायोनि
र्वायदिनभवतिदर्शनेनत्कथंकाव्यमित्यर्थदृष्टिरूपःसमाधिरपिनगुणाः ७९ तेननार्थगुणावाच्याः वाच्याव
त्वाः ८० प्रोक्ताःशब्दगुणास्तेयेवर्णाःसमासोरचनातेषांव्यंजकतामिताः केकस्येत्याह मूर्ध्निवर्गांत्यगाः
स्पर्शाअटवर्गारणौलघू अवृत्तिर्मध्यवृत्तिर्वामाधुर्येघटनातथा टठडढवर्जाःकादयोमांताःशिरसिनिजव २९
र्गांत्ययुक्ताः तथारेफणकारौह्रस्वांतरितावितिवर्णाः समासाभावोमध्यमसमासोवतिसमासः तथामाधु
र्यवतीपदांतरयोगेनरचनामाधुर्यस्यव्यंजिका उदाहरणं अनंगरंगप्रतिमंतदंगंभंगीभिरंगीकृतमानतां

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यथाः कुर्वन्ति सूनां सहसा यथैताः स्वानानि शोतापरचित्तनानि २२ योगस्त्वाद्यतृतीयाभ्यामन्त्ययोरेणतुल्ययोः।
टादिः शषौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि वर्गप्रथमतृतीयाभ्यां तद्द्वितीयचतुर्थयोरेफेणाधः उपरि उभयत्र वा यस्य
कस्यचित्तुल्ययोः तेन तस्यैव संबंधो टवर्गो णवर्जितः शकारषकारौ दीर्घसमासो विकटः संघटना च ओजसः
उदाहरणं मूर्ध्नामुद्वृत्तकृत्तेत्यादि २३ श्रुतिमात्रेण शब्दानां येनार्थप्रत्ययो भवेत् साधारणः समग्राणां स प्र-
प्रसादो गुणः स्मृतः समग्राणां रसानां समासानां संघटनानां च उदाहरणं परिम्लानं पीनस्तनजघनसंगादुभ-
यतः तनोर्मध्यस्यान्तः परिमलनमप्राप्य हरितम् इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः कृशाङ्ग्याः संतापं व-
दति बिसिनीपत्रशयनम् यद्यपि गुणपरतंत्राः संघटनादयस्तथापि वक्तृवाच्यप्रबंधानामौचित्येन क्वचित् क्वचि-
त् रचनावृत्तिवर्णानामन्यथात्वमपीष्यते क्वचिद्वाच्यप्रबंधानपेक्ष्य वक्त्रौचित्यादेव रचनादयः यथा मंथा-
यस्तार्णवाम्भः प्लुतकुहरचलन्मन्दरध्वानधीरः कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः कृष्णाक्रो-
धाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोयम् अत्र हि न
वाच्यं क्रोधादिव्यंजकम् अभिनेयार्थं च काव्यमिति तत्प्रतिकूला उद्धता रचनादयः वक्ता चात्र भीमसेनः क्वचि-
द्वाच्यं प्रबंधानपेक्ष्य वाच्यौचित्यादेव रचनादयः यथा प्रौढच्छेदानुरूपोच्छलनरयभवत्सैंहिकेयोपघातत्रा-
साकृष्टाश्वतिर्यग्वलितरविरथेनारुणेनेक्ष्यमाणम् कुर्वत्काकुत्स्थवीर्यस्तुतिमिव मरुतां कंदरावद्धभाजां।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कोरैर्भीममेतन्निपतन्ति वियतः कुंभकर्णोपमांगाम् क्वचिद्वक्तृवाच्यानपेक्षाः प्रबंधोचितामेवैते तथाहि आख्यायि
कायां शृंगारेपि न मसृणवर्णादयः कथायां रौद्रेपि नात्यंतमुद्धताः नाटकादौ रौद्रेपि न दीर्घसमासादयः एवमन्य
का॰प्र॰ दप्यौचित्यमनुसर्तव्यं विबुधैः ॥ ७६ ॥ इति काव्यप्रकाशे गुणालंकारभेदनियतगुणनिर्णयो नामाष्टम उल्लासः
२८ ८॥ ॐ गुणविवेचने कृते लंकाराः प्राप्तावसराः इति शब्दालंकारानाह यदुक्तमन्यथा वाक्यमन्यथान्येन योज्य
28 ते श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा ॥ तथेति श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च तत्र पदभंगश्लेषेण य
था नारीणामनुकूलमाचरसि चेज्जानासि कश्चेतनो वामानां प्रियमादधाति हितकृन्नैवाबलानां भवान् युक्तं
किं हितकर्तनं ननु बलाभावप्रसिद्धात्मनः सामर्थ्यं भवतः पुरंदरमतच्छेदं विधायात्तेकृतः । अभंगश्लेषेण यथा अहो के
नेदृशी बुद्धिर्दारुणा तव निर्मिता त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित् काक्वा यथा गुरुपरतंत्रतया बत दू
रतरं देशमुद्यतो गंतुम् अलिकुलकोकिललालिते नैष्यति सखि सुरभिसमयेसौ ३ वर्णसाम्यमनुप्रासः ।
स्वरवैसादृश्येपि व्यंजनसदृशत्वं वर्णसाम्यं रसाद्यनुगतः प्रकृष्टो न्यासोनुप्रासः छेकवृत्तिगतो द्विधा छेका विद
ग्धाः वृत्तिर्नियतवर्णगतो रसविषयो व्यापारः तद्गतत्वेन इति छेकानुप्रासः वृत्त्यनुप्रासश्च किं तयोः स्वरूपमित्या
ह सोनेकस्य सकृत्पूर्वः अनेकस्य व्यंजनस्य सकृदेकवारं सादृश्यं छेकानुप्रासः उदा ततोरुणपरिस्पंदमां २८
दीकृतवपुः शशी दध्रे कामपरिक्षामकामिनीगंडपांडुताम् एकस्याप्यसकृत्परः एकस्यापि शब्दादनेकस्य च

का ३॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

व्यंजनस्य द्विर्बहुकृत्वो वा साम्यं छेकानुप्रासः तत्र माधुर्यव्यंजकैर्वर्णैरुपनागरिकेष्यते ओजःप्रकाशकैस्तैस्तु
परुषा उभयत्रापि प्रागुदाहृतम् कोमलाख्यैः वर्णैः शेषैः तामेव केचित् ग्राम्येति वदंति उदा अपसारय घनसारं कु
रु हारं दूर एव किं कमलैः अलमलमालि मृणालैरिति वदति दिवानिशं बाला केषांचिदेता वैदर्भीप्रमुखा रीत
यो मताः एतास्तिस्रो वृत्तयो वामनादीनां मते वैदर्भीगौडीपांचाल्याख्या रीतय उच्यंते शाब्दस्तु लाटानुप्रासो भेदे तात्प
र्यमात्रतः शब्दगतोऽनुप्रासः शब्दार्थयोरभेदेऽप्यन्वयमात्रभेदाल्लाटजनवल्लभत्वाल्लाटानुप्रासः शब्दार्थयोरभेदेऽप्येषा।
पदानुप्रास इत्यन्ये पदानांसः स इति लाटानुप्रासः उदा यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य।
यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ५ पदस्यापि अपिशब्देन स इति समुच्चीयते उदा वदनं वरव।
र्णिन्यास्तस्याः सत्यं सुधाकरः सुधाकरः क्व नु पुनः कलंकविकलो भवेत् ६ वृत्तावन्यत्र तत्र वा नाम्नः स वृत्त्यवृ।
त्त्योश्च एकस्मिन्समासे भिन्ने समासे वा समासासमासयोर्वा नाम्नः प्रातिपदिकस्यानुप्रासः पदस्य साम्यम् उदा सित
करकररुचिरविभा विभाकराकार धरणिधव कीर्तिः पौरुषकमला कमला सापि तवैवास्ति नान्यस्य तदेवं पंचधा मत
तः अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः यमकम् समरसमरसोयमित्यादावेकेषामर्थवत्वेऽन्येषामनर्थक
कत्वे भिन्नार्थानामिति न युज्यते व्रत्रमित्यर्थे सतीत्याद्युक्तं सेतिसरो बस इत्यादि वैलक्षण्यपनत्तिर्नैव क्रमेणास्थिता पा
दतद्भागवृत्त्यात घात्यनेकताम् प्रथमो द्वितीयादौ द्वितीयस्तृतीयादौ तृतीयश्चतुर्थे प्रथमस्त्रिष्वपीति सप्त प्रथा।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मोद्वितीयेऽस्तृतीयश्चतुर्थेऽइति प्रथमश्चतुर्थे द्वितीयस्तृतीयइतिद्वेतदेवंपादद्वयेनभेदम् अर्थावृत्तिः श्लोकावृत्तिश्चेतिद्वे
द्वि विभक्तेचतुष्पादेप्रथमादिपादादिभागः पूर्ववद्द्वितीयादिपादादिभागेष्वेवंतर्भागोन्तर्भागेष्विति विंशतिर्भेदाः।
का॰प्र॰ श्लोकान्तेद्विन भागावृत्तिः त्रिखंडेत्रिंशत् चतुःखंडेचत्वारिंशत् प्रथमपादादिगतांत्यार्धादिभागोद्वितीयपा
२९ दादिगते आद्यार्धादिभागेयमते इत्याद्यन्वर्थनाम्नुसरणोनानेकभेदम् अन्तादिकमाद्यंतकंतत्समुच्चयः म
२९ ध्यादिकमादिमध्यमंतमध्यमध्यांतकंचतेषांसमुच्चयःतथातस्मिन्नेवपादे आद्यादिभागानांमध्यादिभागेष्व
नियतेचस्थानेआवृत्तिरितिप्रभूततमभेदम् तदेतत्काव्यगडुभूतमितिनास्यभेदलक्षणंकृतम् दिङ्मात्रमु
दाहियते सन्नारीभरणोमायमाराध्यविधुशेखरम् सन्नारीभरणोमायस्ततस्त्वंपृथिवींजय विनायमेनोनय
तास्सुखादिनाविनायमेनोनयतास्सुखादिना महाजनोदीयतमानसादरंमहाजनोदीयतमानसादरं सन्नारीभरणो
मस्थमवलंबिततारवम् सर्वदारणामोनैषीदवानलसमस्थितः अनेतमद्दिमव्याप्तविश्वोवेयानवेदयाम् याच
मतिवमजतेप्रणतेमानवेदयाम् यदानतोयदानतोनयात्ययंनयात्ययम् शिवेहितांशिवेहितांस्मरामितांस्मरामि
ताम् सरस्वतिप्रसादंमस्थितिंचित्तसरस्वति सरस्वतिकुरुक्षेत्रेकुरुक्षेत्रसरस्वति ससारसाकंदर्पेणाकंदर्पेणा २९
ससारसा शरन्नवानाबिभ्राणानाबिभ्राणाशरन्नवा मधुपराजिपराजितमानिनीजनमनस्सुमनस्सुरभिश्रिय
मू अभृतवारिनवारिजविभ्रमंस्फुरितताम्रततामवनंजगत् एवंवैचित्र्यमहेतोः स्थित[illegible]ऽन्वयम् वाच्यभे
न्त

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

देनभिन्नायद्युगपद्भाषणस्पृशः श्लिष्यंतिशब्दाः श्लेषोसावक्षरादिभिरष्टधा अर्थभेदेनशब्दभेदइतिदर्शनेका
व्यमार्गेस्वरोनगण्यते इतिचनयेनवाच्यभेदेनभिन्नाअपिशब्दायद्युगपदुच्चारणेन श्लिष्यंतिभिन्नंस्वरूपमपह्नु
वतेसश्लेषः सचवर्णपदलिंगभाषाप्रकृतिप्रत्ययविभक्तिवचनानांभेदादष्टधा क्रमेणोदाहरणानि अलं
कारः शंकाकरनरकपालंपरिजनोविशीर्णांगोभृंगीवसुचवृषएको गतवयाः अवस्थेयंस्थाणोरपिभवति।
सर्वामरगुरोर्विधौवक्रेमूर्ध्निस्थितवतिवयंकेपुनरिमे पृथुकार्तस्वरपात्रंभूषितनिःशेषपरिजनंदेव विलस
त्करेणुगहनंसंप्रतिसममावयोःसदनम् भक्तिप्रह्वविलोकनप्रणयिनीनीलोत्पलस्पर्धिनीध्यानालंबनतांस
माधिनिरतैर्नीतेहितप्राप्तये लावण्यस्यमहानिधीरसिकतांलक्ष्मीदृशोस्तन्वतीयुष्माकंकुरुतांभवार्तिशमनं
नेत्रेतनुर्वाहरेः एषवचनश्लेषोपि महदेसुरसंधम्मेतमवसमासंगमागमाहरणे हरबहुसरणंतंचित्तमो।
हमवसरउमेसहसा अयंसर्वाणिशास्त्राणिहृत्सुज्ञेषुचवक्ष्यति सामर्थ्यकृदमित्राणांमित्राणांचनृपात्मजः र
जनिरमणमौलेःपादपद्मावलोकक्षणसमयपराप्तापूर्वसंपत्सहस्रम् प्रमथनिवहमध्येजातुचित्त्वत्प्रसा।
दादहमुचितरुचिःस्यांनंदितासातथामे सर्वस्वंहरसर्वस्यत्वंभवच्छेदतत्परः नयोपकारसांमुख्यमायासितन
नुवर्तनम् भेदाभावात्प्रकृत्यादेर्भेदोपिनवमोभवेत् नवमोपीत्यभिन्नक्रमः उदाहरणं योसकृत्परगोत्रा।
णांपक्षच्छेदक्षणाक्षमः शतकोटिदतांबिभ्रद्विबुधेंद्रःसराजते अत्रप्रकरणादिनियमाभावात्द्वावप्यर्थौवा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यो ननु स्वरितादिगुणाभेदाद्भिन्नप्रयत्नोच्चार्याणां तदभेदादभिन्नप्रयत्नोच्चार्याणां च शब्दानां प्रबंधे ऽलंकारान्तरप्रति
भोत्पत्तिहेतुः शब्दश्लेषो ऽर्थश्लेषश्चेति द्विविधो ऽप्ययमर्थालंकारमध्ये गणितो ऽन्यैरिति कथमयं शब्दालंकारः उच्यते
का॰प्र॰ ३॰ इह दोषगुणालंकाराणां शब्दार्थगतत्वेन यो विभागः सो ऽन्वयव्यतिरेकाभ्यामेव व्यवतिष्ठते तथाहि कष्टत्वादिगा
ढत्वाद्यनुप्रासादयो व्यर्थत्वाप्रौढ्याद्युपमादयस्तद्भावतदभावानुविधायित्वादेव शब्दार्थगतत्वेन व्यवस्थाप्यन्ते स
30 र्वे च पल्लवताम्रभास्वत्करविराजिनेत्यभंगशब्दश्लेषः प्रभातसंध्येवास्वापफललुब्धेहितप्रदेत्यसभंगश्लेषश्च द्वा
वपि शब्दसाताश्रयाविति द्वयोरपि शब्दश्लेषत्वमुपपन्नं न त्वाद्यस्यार्थश्लेषत्वम् अर्थश्लेषस्य तु स विषयो यत्र शब्द
परिवर्तनेपि न श्लेषत्वखंडना यथा स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम् अहो सुसदृशी वृत्तिस्तुला
कोटेः खलस्य च न चायमुपमाप्रतिभोत्पत्तिहेतुः श्लेषोपि तु श्लेषप्रतिभोत्पत्तिहेतुरुपमा तथाहि यथा कमल
मिव मुखं मनोज्ञमेतत्कचतितरामित्यादौ गुणसाम्ये क्रियासाम्ये उभयसाम्ये वा उपमा तथा सकलकलं पुरमेत
ज्जातं संप्रति सुधांशुबिंबमिवेत्यादौ शब्दमात्रसाम्येपि सा युक्तैव तथा ह्युक्तं रुद्रटेन स्फुटमर्थालंकारावेतावुपमा
समुच्चयौ किंतु आश्रित्य शब्दमात्रं सामान्यमिहापि संभवतः इति न च कमलमिव मुखमित्यादिः साधारणधर्म
प्रयोगशून्य उपमाया विषय इति वक्तुं युक्तं पूर्णोपमाया निर्विषयत्वापत्तेः देवत्वमेव पातालमाशानां त्वं निबंध ३॰
नम् त्वं चामरमरुद्भूमिरेको लोकत्रयात्मकः इत्यादौ श्लेषस्य चोपमाद्यलंकारविविक्तो ऽस्ति विषय इति द्वयोर्या

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वोक्तंकरएव उपपत्तिपर्यालोचनेनतूपमायामेवयुक्तोऽयंविषयः अन्यथाहिविषयापहारएवसर्वोपमायाःस्यात्।
नचअविद्दुस्तंदरीनित्यंगलल्लावण्णाविद्दुकेत्यादौविरोधप्रतिभोत्पत्तिहेतुश्लेषोपितुश्लेषप्रतिभोत्पत्तिहेतुर्विरो
धः नह्यत्रार्थद्वयप्रतिपादकःशब्दश्लेषः द्वितीयस्यार्थस्यप्रतिभातमात्रस्याप्रतिरोधात् नचविरोधाभासएव।
विरोधःश्लेषाभासःश्लेषः तस्मादेवमादिषुवाक्येषुश्लेषप्रतिभोत्पत्तिहेतुरलंकारान्तरमेव तथाच सद्वंशमु
क्तामणिः नाल्पःकविरिवस्वल्पश्लोकोदेवमहानिभवान् अनुरागवतीसन्ध्यादिवसस्तत्पुरःसरः आदायचाप
मचलंकृत्वाहीनंगुणंविषमदृष्टिः यश्चित्रमच्युतशरोलक्ष्यमभांक्षीन्नमस्तस्मै इत्यादावेकदेशविवर्तिरूप
कश्लेषव्यतिरेकसमासोक्तिविरोधत्वमनुचितेनतुश्लेषत्वं शब्दश्लेषइतिचोच्यतेअर्थालंकारमध्येचलक्ष्यतेइति
कोऽयंनयः किंचवैचित्र्यमात्रमलंकारइति यएवकविप्रतिभासंरम्भगोचरस्तत्रैववैचित्र्यमितिसैवालंकारभूमिः
अर्थमुखप्रेक्षित्वमेतेषांशब्दानामितिचेदनुप्रासादीनामपितथैवेतितेप्यर्थालंकाराःकिंनोच्यन्ते रसादिव्यंजक
स्वरूपवाच्यविशेषसव्यपेक्षत्वेपिह्यनुप्रासादीनामर्थालंकारता शब्दगुणदोषाणामप्यर्थापेक्षयैवगुणदोषता
अर्थगुणदोषालंकाराणांशब्दापेक्षयैवस्थितिरितितेपिशब्दगतत्वेनोच्यन्ताम् विधौवक्त्रेमूर्ध्नीत्यादौचवर्णादि
श्लेषएकप्रयत्नोच्चार्यत्वेर्थश्लेषत्वंशब्दभेदेपिप्रसज्यतीत्येवमादिस्वयंविचार्यम् तच्चित्रंयत्रवर्णानांखड्गाद्याकृ
तिहेतुता सन्निवेशविशेषेणयत्रन्यस्तावर्णाःखड्गमुरजपद्माद्याकारमुल्लासयन्ति तच्चित्रंकाव्यम् कष्ट

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

काव्यमेतदितिदिङ्मात्रंप्रदर्श्यते उदा० मारारिशक्ररामेभमुखैरासाररंहसा सारारब्धस्तवानित्यंतदर्तिहरणा
क्षमा मातानतानांसंघट्टःश्रियांबाधितसंभ्रमा मान्याथसीमारामाणांशंमेदिश्यादुमादिजा खड्गबंधः सरला
बहुलारंभतरलालिबलारवा वारलाबहुलामंदकरलाबहुलामला मुरजबंधः भासतेप्रतिभासाररसाभाता
का॰प्र॰ हताविभा भावितात्माशुभावादेदेवाभावततेसभा पद्मबंधः रसासाररसासारसायताक्षक्षतायसा सातावातत
३१ वातासारक्षतस्त्वस्त्वतक्षर सर्वतोभद्रः एते भविनोप्यन्येप्रभेदाःशक्तिमात्रप्रकाशकाः ननुकाव्यरूपतांदधतीतिन
31 प्रदर्श्यंते पुनरुक्तवदाभासोविभिन्नाकारशब्दगः एकार्थतेव विभिन्नरूपसार्थकानर्थकशब्दनिष्ठमेकार्थत्वे
नैवामुखेभासनंपुनरुक्तवदाभासः शब्दस्य सभंगाभंगरूपकेवलशब्दनिष्ठः उदा० अरिवधदेहशरीरःसहसा
रथिसूततुरगपादातः भातिसदानत्यागःस्थिरतायामवनितलतिलकः चकासत्यंगनारामाःकौतुकानंदहे
तवः तस्यराज्ञःसुमनसोविबुधाःपार्श्ववर्तिनः तथाशब्दार्थयोरयम् उदा० तनुवपुरजघन्योसौकरिकुंजर
रुधिररक्तखरनखरः तेजोधाममहःपृथुमनसामिंद्रोहरिर्जिष्णुः अत्रैकस्मिन्पदेपरिवर्तितेनालंकारइति
शाब्दाअन्योयस्मिंस्तुपरिवर्तितेपितन्नहीयतेइत्यर्थनिष्ठइतिउभयालंकारोयम् ॥ ९ ॥ इतिकाव्यप्रका ३१
शेशब्दालंकारनिरूपणंनामनवमउल्लासः ॥ ९ ॥ अर्थालंकारानाह साधर्म्यमुपमाभेदे उपमानोप
मेययोरेवनकार्यकारणादिकयोःसाधर्म्यंभवतीतितयोरेवसमानेनधर्मेणसंबंधःउपमा भेदग्रहणमनन्व

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यच्चव छेदार्थम् ग्रहणं लुप्ताच उपमानोपमेयसाधारणधर्मोपमाप्रतिपादकानामनुपादाने ग्रहणं एकस्य द्वयो
स्त्रयाणां वा लोपे लुप्ता साग्रिमा श्रौत्यार्थी च भवेद्वाक्ये समासे तद्धिते तथा अग्रिमाग्रहणं यथेववाशब्दाय त्यवा।
त्तस्यैवोपमानताप्रतीतिरिति यद्यप्युपमानविशेषणान्यैते तथापि शाब्दशक्तिमहिम्ना श्रुत्यैव षष्ठीवत्संबंधं प्रति
पादयंतीति तत्सद्भावे श्रौत्युपमा तथैव तत्र तस्यैवेत्यनेनैवार्थे विहितस्य वतेरुपादाने तेन तुल्यमित्यादावुपमेयए
व तत्तुल्यमस्येत्यादौ चोपमानएव इदं च तत्र च तत्तुल्यमित्युभयत्रापि तुल्यादिशब्दानां विश्रांतिरिति साम्यपर्यालोच
नया तुल्यताप्रतीतिरिति तत्र साधर्म्यस्यार्थत्वात्तुल्यादिपदोपादाने आर्थी तद्वत्तेन तुल्यमित्यादिना विहितस्य व
तेः स्थितौ इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेति नित्यसमासे इवशब्दयोगे समासगा क्रमेणोदाहरणा।
स्वमेयैः समरे श्रुत्वा विजयश्रीर्नितंबचति प्रभावप्रभवं कांतं स्वाधीनपतिका यथा चकितहरिणालोललोचनायाः
क्रुधि तरुणारुणतारहारिकांति सरसिजमिदमाननं च तस्याः सममिति चेतसि संमदं विधत्ते आर्थी अस्या
यत्नैर्नियमकारिभिरुद्धृतानां दिव्यैः प्रभाभिरनपायमयैरुपायैः पौरिर्भुजैरिव चतुर्भिरदः सदा यो लक्ष्मीविला
सभवनैर्भुवनं बभार श्रावितयमनोरथपथप्रथनेषु प्रगुणगरिमगीतश्रीः सुरतरुसदृशः स भवानभिलष।
णीयः क्षितीश्वर न कस्य गांभीर्यगरिमा तस्य सत्यं गंगाभुजंगवत् दुरालोकः स समरे निदाघांबररत्नवत्।
स्वाधीनपतिका कांतं भजमाना यथालोकोत्तरचमत्कारभूः तथा जयश्रीस्तदासेवनेनेत्यादिना प्रतीयमानेन

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

व्यंग्येन विना यद्यपि नोक्तं वैचित्र्यं वैचित्र्यं चालंकारस्तथापि न ध्वनिगुणीभूतव्यंग्यव्यवहारः नखलु व्यंग्यसंस्प
र्शपरामर्शादत्र चारुताप्रतीतिरपितु वाच्यवैचित्र्यप्रतिभासादेव रसादिरूपव्यंग्यस्य पोर्थालंकारान्तरं च सर्वत्राव्यभि
चारीत्यगणयित्वैव तदलंकारा उदाहृताः तद्रहितत्वेन तूदाह्रियमाणा विरसतामावहन्तीति पूर्वापरविरुद्धाभि
का॰प्र॰ धानमिति न चोदनीयम् तद्वद्धर्मस्य लोपे स्यान्न श्रौती तद्धिते पुनः तद्वदाकारसमासगम्यत्वे श्रौती आर्थी च यधर्मः सा
३२ धारणात्वद्धिते कल्पबादौ त्वार्थ्येव तेन सा पंचधा उदाहरणं यत्तस्यानन्यसामान्यसौजन्योत्कर्षशालिनः कर
णीयं वचश्चेतः सत्यं तस्यामृतं यथा श्रान्तस्य कस्य लोकोपरायपरिभ्रमन् प्रत्यर्थिसेनया दृष्टः कृतान्तेन स
मः प्रभुः करवाल इवाचारस्तस्य वागमृतोपमा विषकल्पमनो वित्तं यदि जीवसि तत्सखे उपमानानुपादाने वा
क्यगा थ समासगा सकुन्नलकरणापरिवीसामसिरिविअरणाणामवसकपवस्तदीसरः अथवणासममरः सति
समे सेसमं तेरणाक बसइत्यत्र कब्सममिति समित्सममित्यत्र चरणरणमिति पाठे एवेव समासगा वादेर्लोपे समासे
सा कर्माधारक्यचि क्यङि कर्मकर्त्रोर्णमुलि वा शब्द उपमाद्योतक इति वादेरुपमाप्रतिपादकस्य लोपे षट् क
र्मणोपि कर्त्रणाश्चोत्पन्नेन क्यचा कर्तरि क्यङा च कर्मकर्त्रोरुपपदयोर्णमुला च सा भवेत् उदाहरणं ततः कु
मुदनाथेन कामिनीगंडपांडुना नेत्रानंदेन चंद्रेण माहेंद्री दिगलंकृता यथा वा अमितभुजगभीषणासिप ३२
त्रोरुहरुहिकाहितचित्ततूर्णचारः पुलकिततनुरुत्कपोलकांतिः प्रतिभटविक्रमदर्शनेयमासीत् पौरं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सुतीयति जनैः समरांगणे साधवेतः पुरीयति विचित्रचरित्रचंचुः नारीयते समरसीम्नि कृपाणपाणेरालोकनस्य ल
लितानि सपत्नसेना अथ येनिदाघघर्मांशुदर्शं पश्यंति तं परे स पुनः पार्थसंचारं संचरत्यवनीपति एतद्विलो।
पेद्विपमासगा एतयोर्थमेवाद्योः उदाहरणं सविताविधवति विधुरपि सवितरति तथा दिनंतियामिन्यः या।
मिनयंति दिनानि च सुखदुःखवशीकृते मनसि परिपंथिमनो राज्यपतिरपि द्विषाक्रमः संपदाय प्रवर्तते सोदा
ज्ञेतराजतेजरः यमोपमानयोर्लोपहेतोर्वाक्ये च दृश्यते उदाहरणं इंदुहृत्तोमदिहृसिकंठकलित्त्रा
श्लेरार वराः मालइउसमसविंछे भ्रमरभ्रमंतो राणाविहिसि ऊअस्मेन समसिनिपाडेवाक्यगा कचिवा
सुपमेयासे आसिनिवासे अवातिविक्रमालोकविकस्वरविलोचनः कृपाणोदग्रदोर्दंडः ससहस्रायुधीयति
अत्रात्मोपमेयः विलोपि च समासगा यथा राणावादिधर्मोपमानानां उदाहरणं तरुणिमनि कृतावलोकना।
ललितविलाससविलब्धविग्रहा स्मरशरविसरापितांतरा मृगनयना हरते मुनेर्मनः अत्र समस्तु पमानेत्यादिना
यदा समासमलोपो अकृ रस्याचारस्यायः स्खलतया व्यवसायादयः स्खलितान्विकृत्यायःमूलिक इत्यतिशयोक्तिः नत्व
नूराचारोपमेयेते द्वापथमेवादीनां लोपे त्रिलोपे इयमुपमा एवमेकोनविंशतिः लुप्ताभेदाभिः सह पंचविंशतिः
अनयेनेव राजा श्रीदैन्येनेव मनस्विता मम्लौ साथ विषादेन पद्मिनीव हिमांभसा इत्यभिन्ने साधारणे धर्मे ज्ञेया।
नेत्रे व नयनानंदः स्वरेव मदकारणम् अभूतेव समाकृष्टसर्वलोकानितंबिनी इति भिन्ने वा तस्मिन्नेकस्यैव ब

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रूपमानोपादाने मालोपमा यथोत्तरमुपमेयस्योपमानत्वे पूर्ववदभिन्नभिन्नधर्मत्वे अन्यैवानवरतकनकवितर
णजललवभृतकरतरंगितार्थिततेः भणितिरिव मतिर्मतिरिव चेष्टा चेष्टेव कीर्तिरतिविमला मतिरिव मू
र्तिर्मधुरा मूर्तिरिव सभा प्रभावचिता तस्य सभेव जयश्रीः शक्या जेतुं नृपस्य न परेषामित्यादिका रशनोपमा
च न लक्षिता एवंविधवैचित्र्यसहस्रसंभवात् उक्तभेदानतिक्रमाच्च ८९ उपमानोपमेयत्वे एकस्यैवैकवाक्य
गे अनन्वयः उपमान्तरसंबंधाभावोऽनन्वयः उदाहरणं न केवलं भाति नितान्तकान्तिर्नितंबिनी सैव नितंबि
नीव यावद्विलासायुधलास्यवासास्ते तद्विलासा इव तद्विलासाः विपर्यास उपमेयोपमा तयोः तयोरुपमा
नोपमेययोः परिवृत्तिरर्थाद्वाक्यद्वये इतरोपमानव्यवच्छेदपरा उपमेयेनोपमेत्युपमेयोपमा उदाहरणं कमले
व मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः धरणीव धृतिर्धृतिरिव धरणी सततं विभाति बत यस्य ॥
संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् समेनोपमानेन उदाहरणं उन्मेषं यो मम न सहते जातिवैरी निशा
यामिन्दोरिन्दीवरदलदृशा तस्य सौन्दर्यदर्पः नीतः शान्तिं प्रसभमनया वक्त्रकान्त्येति हर्षाल्लग्ना मन्ये ललिततनु
ते पादयोः पद्मलक्ष्मीः लिंपतीव तमोंगानि वर्षतीवांजनं नभः असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता इत्या
दौ व्यापनादि लेपनादिरूपतया संभावितम् ससंदेहस्तु भेदोक्तौ तदनुक्तौ च संशयः भेदोक्तौ यथा अयं मा ३३
र्तण्डः किं स खलु तुरगैः सप्तभिरितः कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतम् कृतान्तः किं साक्षान्महि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

षवहनोसावितिचिरंसमालोक्याजौत्वांविदधतिविकल्पान्प्रतिभटाः भेदोक्तावित्यनेनकेवलमयंनिश्चयगर्भो
यावन्निश्चयांतोपिसंदेहःस्वीकृतः यथा इंदुःकिंक्वकलंकःसरसिजमेतत्किमंबुकुत्रगतम् ललितसवि
लासवचनैर्मुखमितिहरिणाक्षिनिश्चितंपरतः किंतुनिश्चयगर्भइवनात्रनिश्चयःप्रतीयमानइत्युपेक्षितो
भट्टोद्भटेन तदनुक्तौयथा अस्याःसर्गविधौप्रजापतिरभूच्चंद्रोनुकांतिप्रदःशृंगारैकरसःस्वयंनुमदनोमा
सोनुपुष्पाकरः वेदाभ्यासजडःकथंनुविषयव्यावृत्तकौतूहलोनिर्मातुंप्रभवेन्मनोहरमिदंरूपंपुराणोमुनिः
९१ तद्रूपकमभेदोयःउपमानोपमेययोः अतिसाम्यादनपह्नुतभेदयोरभेदः समस्तवस्तुविषयंश्रौताआ
रोपितायदा आरोपविषयाइवारोप्यमाणायदाशब्दोपात्तास्तदासमस्तानिवस्तूनिविषयोस्येतिसमस्तवस्तुवि
षयम् आरोपिताइतिबहुवचनमविवक्षितम् ज्योत्स्नाभस्मच्छुरणधवलाबिभ्रतीतारकास्थीन्यंतर्धानव्य
सनरसिकारात्रिकापालिकीयम् द्वीपाद्द्वीपंभ्रमतिदधतीचंद्रमुद्राकपालेन्यस्तंसिद्धांजनपरिमलंलाञ्छ
नस्यच्छलेन अत्रपादत्रयमेतर्यानरसिकत्वमारोपितधर्मएवेतिरूपकपरिग्रहेसाधकमस्तितल्लोकदर्शका
नकार्याः ९२ विम्बस्यगिनहृदयेलग्नमस्तिद्धाञ्जनेनतत इतिपाठः चतुर्थःपादः एवंरूपकेशेषविनिर्वाहः
श्रौताआर्थाश्चतेयस्मिन्नेकदेशविवर्तितत् केचिदारोप्यमाणाःशब्दोपात्ताःकेचिदर्थसामर्थ्यादवसेयाःइत्येक
देशविवर्तनादित्येकदेशविवर्ति यथा जस्सरणांतेउरएकरेकुणंतस्समंडलग्गलअम् रससंमुहीविसह

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सापरम्मुहीहोइरिउसेणा अत्ररणस्यांतःपुरत्वमारोप्यमाणोपात्तेयाते मंडलाग्रलतायानायिकात्वंरिपुसे।
नायाश्चप्रतिनायिकात्वमर्थसामर्थ्यादवसीयतेइत्येकदेशविशेषेणवर्तनादेकदेशविवर्ति सांगमेतत् ॥
का॰प्र॰ उक्तस्त्रिभेदंसावयवम् निरंगंतुशुद्धम् यथा कुरंगीवांगानिस्तिमितयतिगीतध्वनिषुयत्सखींकांतोदंत
३५ श्रुतमपिपुनःप्रश्नयतियत् अनिद्रंयच्चांतःस्वपितितदहोवेद्म्यभिनवांप्रवृत्तोस्याःसेक्तुंहृदिमनसिजःप्रेम
35 लतिकाम् मालातुपूर्ववत् मालोपमायामिवैकस्मिन्निहबहवआरोपिताः यथा सौंदर्यस्यतरंगिणीत
रुणिमोत्कर्षस्यहर्षोद्गमःकांतेःकार्मणकर्मनर्मरहसामुल्लासनावासभूः विद्यावक्रगिरांविधेरनवधि
प्रावीण्यसाक्षात्क्रियाबाणाःपंचशिलीमुखस्यललनाचूडामणिःसाप्रिया ९३ नियतारोपणोपायःस्यादारो
पःपरस्ययः तत्परंपरितंश्लिष्टेवाचकेभेदभाजिवा यथा विद्वन्मानसहंसवैरिकमलासंकोचदीप्तद्युतेदुर्गा
मार्गणनीललोहितसमित्स्वीकारवैश्वानर सत्यप्रीतिविधानदक्षविजयप्राग्भावभीमप्रभोसाम्राज्यंवरवी
रवत्सरशतंवैरिंचमुच्चैःक्रियाः अत्रमानसमेवमानसम् कमलायाःसंकोचएवकमलानामसंकोचः दु
र्गाणाममार्गणमेवदुर्गायामार्गणम् समितांस्वीकारएवसमिधांस्वीकारः सत्येप्रीतिरेवसत्यामप्रीतिः वि ३५
जयःपरपराभवएवविजयोर्जुनः एतदारोपणनिमित्तोहंसादेरारोपः यद्यपिशब्दालंकारोयमित्युक्तंव
क्ष्यतेचतथापिप्रसिद्ध्यनुरोधादत्रोक्तः एकदेशविवर्तिहीदमन्यैरभिधीयते भेदभाजियथा आलानंज

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यत्कुंजरस्य हृदि दोःसलिलं विपक्षारियोः सर्वदिक्करवालचंद्रमहसो लीलोपधानं श्रियः संग्रामामृतसागरप्रम
थनक्रीडाविधौ मंदरो राजन्राजति वीरवैरिवनितावैधव्यदस्ते भुजः अत्र जयादेर्भिन्नशब्दवाच्यत्वं कुंजरत्वारो
पे भुजस्यालानत्वाद्यारोपो युज्यते अलौकिकमहालोकप्रकाशितजगत्रयः स्तूयते देव सद्वंशमुक्तारत्नं
न कैर्भवानिति निरवधि च निराश्रयं च यस्य स्थितमनिवर्तितकौतुकप्रपंचम् प्रथम इह भवान्स कूर्ममूर्ति
र्जयति चतुर्दशलोकवल्लिकंद इति च अत्र मालारूपकमपि परं परितं द्रष्टव्यम् किसलयकरैर्लतानां कर
कमलैः कामिनां मनो जयति नलिनीनां कमलमुखैर्मुखेंदुभिर्योषितां मदनः इत्यादिरशनारूपकं ना
वैचित्र्यवदिति न लक्षितम् ६४ प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः उपमेयमसत्यं कृत्वा उपमा
नं सत्यतया यत्स्थाप्यते सा पह्नुतिः उदाहरणं अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये कलंको नैवायं
विलसति शशांकस्य वपुषि अमुष्येयं मन्ये विगलदमृतस्यंदशिशिरे रतिश्रांता शेते रजनिरमणी गाढ
मुरसि इत्थं वा वत सखि कियदेतत्पश्य वैरं स्मरस्य प्रियविरहकृशेस्मिन्रागिलोके तथाहि उपवनसहका
रोद्भासिभृंगच्छलेन प्रतिविशिखमनेनोट्टंकितं कालकूटम् अत्र हि न सभृंगाणि सहकाराणि अपि तु स
कालकूटाः शराः इति प्रतीतिः एवं वा अमुष्मिंल्लावण्यामृतसरसि नूनं मृगदृशः स्मरः शर्वप्लुष्टः पृथुजघ
नभागे निपतितः यदंगांगाराणां प्रशममपिशुना नाभिकुहरे शिखा धूमस्येयं परिणमति रोमावलिवपुः अत्र

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नवोमावलिर्भ्रूमषिरेखेयमिति प्रतिपत्तिः एवमियंभंग्यंतरेणश्लेषः सवाक्य एकस्मिन्यत्रानेकार्थानामेवेत
एकार्थप्रतिपादकानामिव शब्दानां यत्रानेकोर्थः सश्लेषः उदाहरणं उदयमयते दिङ्मालिन्यं निराकुरुतेतरां
का॰प्र॰ नयति नियनं निद्रामुद्रां प्रवर्तयति क्रियाः रचयति तरां स्वैराचारप्रवर्तनकर्तनं बत ततलसन्ते जःपुंजो विभा
३५ ति विभाकरः अत्राभिधाया अनियंत्रणात् द्वावपि अर्कभूपौ वाच्यौ ९५ परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः
35 प्रकृतार्थप्रतिपादकेन वाक्येन विशेषणमाहात्म्यान्न तु विशेष्यस्य सामर्थ्यादपि यदप्रकृतस्याप्यर्थस्याभिधानं
सा समासेन संक्षेपेणार्थद्वयकथनात्समासोक्तिः उदाहरणं लहिऊण तुज्झ बाहुप्फंसं जीए स कोवि
उल्लासो जअलच्छी तह विरहे णाहुज्जला दुब्बला णं सा अत्र जयेलक्ष्मीशब्दस्य केवलस्य कांतावाचकत्व
नास्ति निदर्शनाभवन्वस्तुसंबंध उपमापरिकल्पकः निदर्शनं दृष्टांतकारणम् उदाहरणं क्व सूर्यप्र
भवो वंशः क्व चाल्पविषया मतिः तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् अत्रोडुपेन सागरतरणमिव
मन्मत्या सूर्यवंशवर्णनमित्युपमायां पर्यवस्यति यथा वा उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिम
धाम्नि याति चास्तम् वहति गिरिरयं विलंबिघंटाद्वयपरिवारितवारणेन्द्रलीलाम् अत्र कथमन्यस्य ली
लामन्यो वहतीति तत्सदृशीमित्युपमायां पर्यवसानम् दोर्भ्यां तितीर्षति तरंगवतीभुजंगमादातुमिच्छति करे हरि ३५
णांकबिंबम् मेरुं लिलंघयिषति ध्रुवमेष देवयस्ते गुणान् गदितुमुद्यममादधाति इत्यादौ मालारूपा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पेषाद्दृष्टव्या स्वस्वहेतुत्वन्वयसंगतिः क्रियेयै वच सा परा क्रियेयैव स्वरूपस्वकारणयोः संबंधो यदवगम्यते
सा पदार्थनिदर्शना यथा उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् शैलशेखरगतो दृषत्कणश्चा
रुमारुतधुतः पतत्यधः अत्र पातक्रियया पतनस्य लाघवे सत्युन्नतपदप्राप्तिरूपस्य कारणस्य च संबंधः
ख्याप्यते अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया अप्राकरणिकस्याभिधानेन प्राकरणिकस्याक्षेपोऽप्र
स्तुतप्रशंसा सा च कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति तदन्यस्य वचस्तुल्ये तुल्यस्येति पंचधा तदन्य
स्य कारणादेः क्रमेणोदाहरणं याताः किं न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते नो कार्या नितरां कृशा
सि कथयत्येवं सबाष्पे मयि लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा दृष्ट्वा मां हसितेन भाविमरणो
त्साहस्तया सूचितः अत्र प्रस्थानात् किमिति निवृत्तोऽसीति कार्ये पृष्टे कारणमभिहितम् राजन् राजसुता न पा
ठयति मां देव्योऽपि तूष्णीं स्थिताः कुब्जे भोजय मां कुमार सचिवैर्नाद्यापि किं भुज्यते इत्थं राजशुकस्तवारिभ
वने मुक्तोऽध्वगैः पंजरात् चित्रस्थानवलोक्य शून्यवलभावेकैकमाभाषते अत्र प्रस्थानोद्यतं भवन्तं ज्ञात्वा स
हसैव त्वदरयः पलाय्य गता इति कारणे प्रस्तुते कार्यमभिहितम् एतत्तस्य मुखात्कियत्कमलिनीपत्रे कणं
वारिणो यन्मुक्तामणिरित्यमंस्त स जडः शृण्वन्यदस्मादपि अंगुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने शनैः
कुत्रोड्डीय गतो ममेत्यनुदिनं निद्राति नान्तःशुचा अत्रास्थाने जडानां ममत्वं संभावनाम भवतीति सामान्ये प्र

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्तेति विशेषः कथितः सुहृद्वधूबाष्पजलप्रमार्जनं करोति वैरप्रतियातनेन यः स एव पूज्यः स पुमान्स नीति
मांस्तज्जीवितं तस्य स भाजनं श्रियः अत्र हस्तं निहत्य नरकासुरवधूनां यदि दुःखं शमयसि तत्त्वमेव श्लाघ्य इति
विशेषे प्रस्तुते सामान्यमुदितम् तुल्ये प्रस्तुते तुल्याभिधाने त्रयः प्रकाराः श्लेषः समासोक्तिः सादृश्यमात्रं
का० प्र० वा तुल्यात्तुल्यस्य ह्याक्षेपे हेतवः क्रमेणोदाहरणं पुंस्त्वादपि प्रविचलेद्यदि यद्यधोऽपि यायाद्यदि प्रणयने न म
३६ हानपि स्यात् अभ्युद्धरेत्तदपि विश्वमितीदृशीयं केनापि दिक्प्रकटिता पुरुषोत्तमेन येनास्यभ्युदितेन चन्द्र
36 गमितः क्लान्तिं रवौ तत्र ते युज्येत प्रतिकर्तुमेव न पुनस्तस्यैव पादग्रहः नीतोऽनेन तदुन्नतिं यदि ततः किं लज्ज
से नो मनागस्त्वेवं जडधामता तु भवतो यद्व्योम्नि विस्फूर्जसे आदाय वारि परितः सरितां मुखेभ्यः किं तावद
र्जितमनेन दुरर्णवेन क्षारीकृतं च वडवादहने हुतं च पातालकुक्षिकुहरे विनिवेशितं च इयं च काचिद्वा
च्यप्रतीयमानार्थानध्यारोपेणैव यथा अब्धेरम्भः स्थगितभुवनाभोगपातालकुक्षेः पोतोपाया इह हि ब
हवो लङ्घनेऽपि क्रमन्ते आहो रिक्तः कथमपि भवेदेष दैवात्तदानीं को नाम स्यादवटकुहरालोकनेऽप्यस्य कल्पः
काचित्त्वध्यारोपेणैव यथा कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं वैराग्यादिव वक्षि साधु विदि
तं कस्मादिदं कथ्यते वामेनात्र वटः तमध्वगजनः सर्वात्मना सेवते न च्छायापि परोपकारकृते मार्गस्थि ३६
तस्यापि मे क्वचित्तु श्लेषाध्यारोपेण यथा सोऽपूर्वो रसनाविपर्ययविधिस्तत्कर्णयोश्चापलं दृष्टिः सा मदवि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्यतत्स्वपरादिद्विं भ्रयस्थानेनवा सर्वविस्मृतवानसि भ्रमर हे यद्वारणाघ्राप्यसावंतःसूत्रकारो निषेधान
इति भ्रान्तः कण्षग्रहः अत्र रसनाविपर्यासः सूत्रकरत्वे च भ्रमरस्यासेवनेन हेतुः कर्णचापलं तु हेतुः।
मदः प्रस्तुतसेवनेनिमित्तम् ९०।९८ निगीर्याध्यवसानं तु प्रकृतस्य परेण यत् प्रस्तुतस्य यदन्यत्वं यद्यु
र्थोक्तौ च कल्पनम् कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः विज्ञेयातिशयोक्तिः सा उपमानेनान्तर्निगी
र्णस्योपमेयस्य यदध्यवसानं सैका यथा कमलमनंभसि कमले च कुवलये तानि कनकलतिकायाम्।
सा च सुकुमारसुभगेत्युत्पातपरंपरा केयम् अत्र मुखादि कमलादिरूपतयाध्यवसितम् यच्च तदेवान्य
त्वेनाध्यवसीयते सापरा अण्णं लडहत्तणअं अण्णा विअ का वि वत्तणच्छाआ सामा सामण्णपआवइणो रेह
च्चिअ णाहोइ यद्यर्थस्य यदि शब्देन चेच्छब्देन वा उक्तौ यत्कल्पनमर्थादसंभविनोर्थस्य सा तृतीया यथा राकाया
मकलंकं चेदमृतांशोर्भवेद्वपुः तस्या मुखं तदा साम्यपराभवमवाप्नुयात् कारणस्य शीघ्रकारितां वक्तुं
कार्यस्य पूर्वमुक्तौ चतुर्थी यथा हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन चरमे रमणीवल्लभ।
लोचनविषयं त्वया भजता प्रतिवस्तूपमा तु सा सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः साधारणो धर्म
उपमेयवाक्ये चोपमानवाक्ये च कथितपदत्वस्य दुष्टतयाभिहितत्वात् शब्दभेदेन यदुपादीयते सा वस्तुनो
वाक्यार्थस्योपमानत्वात्प्रतिवस्तूपमा यथा देवीभावं गमिता परिवारपदं कथं भजत्येषा नखलु परिभो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

गयोगंपदेवतद्रूपंकिंतद्वर्त्तनम् यदिदहत्यनलोत्रकिमद्भुतंयदिचगौरवमद्रिषुकिंततः लवणमंबुसदैवमहो
दधेः प्रकृतिरेवसतामविषादिता इत्यादिमालाप्रतिवस्तूपमाद्रष्टव्या एवमन्यत्राप्यनुमंतव्यम् दृष्टांतः
पुनरेतेषांसर्वेषांप्रतिबिंबनम् एतेषांसाधारणधर्मादीनांदृष्टांतेनिश्चयोयत्रेतिदृष्टांतः यथा त्वयिदृष्टे
का०प्र० एवतस्यानिर्वातिमनोभवज्वलितम् आलोकेहिहिमांशोर्विकसतिकुमुदंकुमुद्वत्याः एषसाधर्म्येणवै
३८ धर्म्येणतुयथा तवाहवेसाहसकर्मशर्मणःपाणिंकृपाणांतिकमानिनीषतः भटाःपरेषांविशरारुताम
37 गुर्दधत्यवातेस्थिरतांहिपांसवः सकृद्वृत्तिस्तुधर्मस्यप्रकृताप्रकृतात्मनाम् सैवक्रियासुबह्वीषुकारक
स्येतिदीपकम् प्राकरणिकाप्राकरणिकानामर्थादुपमानोपमेयानांधर्मःक्रियादिरेकवारमे
वयदुपादीयते तदेकवाक्यस्थस्यैवसमस्तवाक्यदीपनाद्दीपकं यथा किवणाणधणंणाआणफण
मणीकेसराइंसीहाणं कुलबालिआणथणाकत्तोछिप्पंतिअमुआणं कारकस्यचबह्वीषुक्रियासु
सकृद्वृत्तिर्दीपकंयथा खिद्यतिकूणतिवेल्लतिविचलतिनिमिषतिविलोकयतितिर्यक् अंतर्नंदतिचुंबि
तुमिच्छतिनवपरिणीतावधूःशयने १०२ मालादीपकमाद्यंचेद्यथोत्तरगुणावहम् पूर्वेणपूर्वेणव ३८
स्तुनोत्तरमुत्तरंचेदुपक्रियतेतन्मालादीपकंयथा संग्रामांगनसंगतेनभवताचापेसमारोपिते देवाक
र्णाययेनयेनसहसायद्यत्समासादितम् कोदंडेनशराःशरैररिशिरस्तेनापिभूमंडलंतेनत्वंभवताच

कीर्तिरमलाकीर्णा च लोकत्रयम् अत्र पश्चिमार्धस्य भवतेत्युक्तं अत्र पादः तेनत्वंनपतेत्वयाश्रितय
शीलेनापि लोकत्रयम् नियतानां सहृद्धर्मः साधुनत्तुल्ययोगिता नियतानां प्राकरणिकानामितिवा।
क्रमेणोदाहरणम् पाण्डुक्षामं वदनं हृदयं सरसं तवालसं च वपुः आवेदयति नितान्तं क्षेत्रियरोगं स
खिहृदन्तः कुमुदकमलनीलनीरजालिर्ललितविलासजुषोर्दृशोः पुरः का अमृतममृतरश्मिरम्बुज
न्मप्रतिहतमेकपदे तदाननस्य ९२ उपमानाद्यदन्यस्य व्यतिरेकः स एव सः अन्यस्योपमेयस्य व्यतिरेक
आधिक्यम् यथा क्षीणःक्षीणोपि शशी भूयोभूयोभिवर्धते सत्यम् विरम प्रसीद सुन्दरि यौवनमनिव
र्तियातं तु इत्यादावुपमानादुपमेयस्याधिक्यमिति यत्केनचिदुक्तम् तदयुक्तम् अत्र यौवनगतास्थैर्य
स्याधिक्यं हि विवक्षितम् हेत्वोरुक्तावनुक्तीनां त्रये साम्ये निवेदिते शब्दार्थाभ्यामथाक्षिप्ते श्लिष्टे तद्वत्त्रि
रष्ट तत् व्यतिरेकस्य हेतुरुपमेयगतमुत्कर्षनिमित्तमुपमानगतं निकर्षकारणं तयोर्द्वयोरुक्तिः एक
तरस्य द्वयोर्वानुक्तिरित्यनुक्तित्रयमेतद्भेदचतुष्टयमुपमानोपमेयभावे शाब्देन प्रतिपादिते तुल्यादिना
तुल्यार्थविहितवतिनावा आर्थेन क्रमेणोक्तौ चत्वार एव भेदाः आक्षिप्ते चौपम्ये तावन्त एव एवं द्वादश
एते च श्लेषेपि भवन्तीति चतुर्विंशतिर्भेदाः क्रमेणोदाहरणम् असिमात्रसहायस्य प्रभूतारिपराभवे।
अन्यतुच्छजनस्येव न स्मयोस्य महाधृतेः अत्रैव तुच्छेति महाधृतेरित्यनयोः पर्यायेण युगपद्वानुपादा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नेमङ्क्षदन्तयम् एवमन्येष्वपि द्रष्टव्यम् अत्रेवशाब्दस्य संभावाच्छाब्दमौपम्यम् अस्तिमात्रमहायोयं प्रभृतावि
पराभवे नैवान्यतरच्छजनवत्समवीर्यंधृतेर्निधि तुल्यार्थेत्रवतिरित्यार्थमौपम्यम् अयं स्तनयनादासीद्
का॰ प्र॰ नतामरससुश्रिया आननेनाकलंकेन जयतीन्दुंकलंकिनम् अत्रेवादितुल्यादिपदविरहेप्याक्षिप्तैवोपा
३८ मा जितेन्द्रियतयासम्यग्विद्यावृद्धनिषेविनः अतिगाढगुणस्यास्यनाब्जवद्भङ्गुरागुणाः अत्रेवार्थेवतिः
२९ गुणशब्दःश्लिष्टः अत्रशाब्दमौपम्यं उपमानोपमेयगतापकर्षोत्कर्षहेत्वोर्द्वयोरप्युक्तौश्रौतोपमेयमे
षयथा अखंडमंडलःश्रीमानपश्यैषपृथिवीपतिः ननिशाकरवज्जातुकलावैकल्यमागतः अ
त्रतुल्यार्थेवतिःकलापदंश्लिष्टः नित्योदितप्रतापेनत्रियामामीलितप्रभः भास्वतानेनभूपेना
भास्वानेषविनिर्जितः अत्राक्षिप्तैवोपमेतिभास्वतेतिश्लिष्टः हरवन्नविषमदृष्टिर्हरिवन्नविभोवि
धूनविततृष्णः रविवन्नचातिदुःसहकरतापितभूःकदाचिदपि अत्रतुल्यार्थेवतिविषमादयःशा
ब्दाःश्लिष्टाः स्वच्छात्मतागुणसमुल्लसितेन्दुबिंबबिंबप्रभाधरमकृत्रिमहृद्यगंधम् यूनामतीवपि
बतांरजनीषुयत्रतृष्णांजहारमधुनाननमंगनानाम् अत्रेवादेस्तुल्यादीनांपदानामभावेपिश्लिष्ट
विशेषणोपादानात्क्षिप्तैवोपमाप्रतीयते इत्येवंजातीयकश्लिष्टोक्तियोग्यपदस्यपृथगुपादानेप्यपिभेदाःसं ३८
भवंतितेनयेवदिशाद्रष्टव्याःनिषेधोवक्तुमिष्टस्ययोविशेषाभिधित्सया वक्ष्यमाणोक्तविषयःसा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

आक्षेपोह्रियामतः विवक्षितस्य प्राकरणिकत्वादनुपसर्जनीयकार्यस्याशक्यवक्तव्यत्वमतिप्रसिद्धत्वेवावि
शेषं वक्तुं निषेधो निषेधश्चस्वयः स्ववक्ष्यमाणाविषय उक्तविषयश्चेति द्विविधआक्षेपः क्रमेणोदाहरणं प
छिहि किंपि कीअविकपराणोक्ति व भणामि अलमहवा अविआरिअकज्जारंभआरिणी मरउ णभणि
स्सम्‌ ज्योत्स्नामौक्तिकदामचंदनरसः शीतांशुकांतद्रवः कर्पूरं कदलीमृणालवलयान्यंभोजिनीप
ल्लवाः अंतर्मानसमास्त्वया प्रभवता तस्याः स्फुलिंगोत्करव्यापाराय भवंति हंत किमनेनोक्तेन न ब्रूमहे
क्रियायाः प्रतिषेधेपि फलव्यक्तिर्विभावना हेतुरूपक्रियाया निषेधेपि तत्फलप्रकाशनं विभावना यथा
अकुसुमितलताभिरहताप्यधत्त रुजमलिकुलैरदष्टापि परिवर्तते स्म नलिनीलहरीभिरलोलिताप्य
घूर्णतमा ९४, ९५, ९६ विशेषोक्तिरखंडेषु कारणेषु फलावचः मिलितेष्वपि कारणेषु कार्यस्याक
थनं विशेषोक्तिः अनुक्तनिमित्ता उक्तनिमित्ता अचिंत्यनिमित्ता च क्रमेणोदाहरणं निद्रानिवृत्तावुदि
ते द्युरत्ने सखीजने द्वारपदं पराप्ते श्लथीकृताश्लेषरसे भुजंगे चचाल नालिंगनतोंगना सा कर्पूर इव द
ग्धोपि शक्तिमान्यो जने जने नमोस्त्ववार्यवीर्याय तस्मै मकरकेतवे स एकस्त्रीणि जयति जगंति कुसु
मायुधः हरतापि तनुं यस्य शंभुना न हृतं बलम्‌ यथा संख्यं क्रमेणैव क्रमिकाणां समन्वयः यथा एक
स्त्रियावसत्सि चेतसि चित्रमत्र देहे वद्विषां च विदुषां च मृगीदृशां च तापं च संमदरसं च रतिं च पुष्णन्‌ शौर्यो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प्रणयाच्चविनयेनचलीलयाच १७ सामान्यंवाविशेषोवातदन्येनसमर्थ्यते यत्तुसोऽर्थान्तरन्यासःसाधर्म्ये
णेतरेणवा साधर्म्येणवैधर्म्येणवायत्रसामान्यंविशेषेण यत्समर्थ्यते विशेषोवासामान्येनसोऽर्थान्तर
का॰प्र॰ न्यासः क्रमेणोदाहरणं निजदोषावृतमनसामतिसुन्दरमेवभातिविपरीतम् पश्यतिपित्तोपहतःश
३९ शिशुभ्रंशंखमपिपीतम् सुसितवसनालंकारायांकदाचनकौमुदीमहसिसुदृशिस्वैरंयान्त्यांगतोऽस्तम
39 भूद्विधुःतदनुभवतःकीर्त्तिःकेनाप्यगीयतयेनसाप्रियगृहमगान्मुक्ताशंकाक्वनास्तिशुभप्रदः गुणा
नामेवदौरात्म्याद्धुरिधुर्योनियोज्यते असंजातकिणस्कंधःसुखंस्वपितिगौर्गलिः अहोहिमेबह्वपरा
द्धमायुषायदप्रियंवाच्यमिदंमयेदृशम् तएवधन्याःसुहृदांपराभवंजगत्यदृष्ट्वैवहियेक्षयंगताः १८
विरोधःसोऽविरोधेऽपिविरुद्धत्वेनयद्वचः वस्तुवृत्तेऽविरोधेऽपिविरुद्धयोरिवयदभिधानंसविरोधः
जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धास्याद्गुणैस्त्रिभिः क्रियाद्वाभ्यामथद्रव्यंद्रव्येणैवेतितेदश क्रमेणोदाह
रणं अभिनवनलिनीकिसलयमृणालवलयादिदवदहनराशिः सुभगकुरंगदृशोऽस्याविधिव
शतस्त्वद्वियोगपविपाते गिरयोऽप्यनुन्नतियुजोमरुदप्यचलोऽब्धयोऽप्यगंभीराः विश्वंभराप्यतिलघु
र्नरनाथतवान्तिकेनियतम् येषांकंठपरिग्रहप्रणयितांसंप्राप्यधाराधरस्तीक्ष्णःसोऽप्यनुरज्यतेचक ३९
मपिस्नेहंपरांप्राप्नोतिच तेषांसंगरसंगसक्तमनसांराज्ञांत्वयाभूपतेपांसूनांपटलैःप्रसाधनविधिर्निर्वर्त्य

तेकौतुकम् सृजतिचजगदिदमवतिचसंहरतिचहेलयैवयोनियतम् अवसरवशतःशफरोजनार्दनःसो
यिचित्रविदम् संततमसलासक्तावक्रतरप्रकृतकर्मघटनयान्नृपते द्विजपत्नीनांकठिनाःसतिभवति।
करोःसरोजसुकुमाराः पेशलमपिखलवचनंदहतितरांमानसंसत्तत्त्वविदाम् परुषमपिसुजनवाक्यं
मलयजरसवत्प्रमोदयति क्रौंचाद्रिरुद्दामदृषद्दृढोसौयन्मार्गणानर्गलशातपाते अभून्नवांभोजद
लाभिजातःसभार्गवःसत्यमखर्वगर्वः परिच्छेदातीतःसकलवचनानामविषयःपुनर्जन्मन्यस्मिन्ननु
भवपथंयोनगतवान् विवेकप्रध्वंसादुपचितमहामोहगहनोविकारःकोप्यन्तर्जडयतिचतापंचकुरु
ते अयंवारामेकोनिलयइतिरत्नाकरइतिश्रितोस्माभिस्तृष्णाकलितमनोभिर्जलनिधिः कएवंजानीते
निजकरपुटीकोटरगतंक्षणादेनंताम्यत्तिमिमकरमापास्यतिमुनिः समदमतंगजमदजलनिष्यंदत
रंगिणीपरिष्वंगात् क्षितितिलकत्वयितटद्वेषिशेकरहृद्गापगापिकालिंदी स्वभावोक्तिर्डिंभादेःस्व
क्रियारूपवर्णनम् द्वयोस्तदेकाश्रययोःरूपवर्णःसंख्यानेच उदाहरणं पश्चादंघ्रीप्रसार्यत्रिकन
तिविततंद्राघयित्वांगमुच्चैरासज्याभुग्नकंठोमुखमुरसिसटांधूलिधूम्रांविधूय ग्रासग्रासाभिला
षादनवरतचलत्प्रोथतुंडस्तुरंगो मंदंशब्दायमानोविलिखतिशयनादुत्थितःक्ष्मांखुरेण॥ ९९ व्याज
स्तुतिर्मुखेनिंदास्तुतिर्वारूढिरन्यथा व्याजरूपाव्याजेनस्तुतिः क्रमेणोदाहरणम् हित्वात्वामुपरो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यद्वंध्यमनसां मन्येन मौलिः पदो लज्जा यज्जनमं तरेखान रमाम न्यत्र संदृश्यते यस्त्यागं तनुतेतरां मुखशतै
र्वृत्याश्रितायाः श्रियः प्राप्य त्यागकृतावमाननमपि त्वय्येव यस्याः स्थितिः हे हेलाजितबोधिसत्त्व वचसां
का॰प्र॰ किं विस्तरैर्वारिधे नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः तृष्यत्पान्थजनोपकारघटनावैमुख्य
८॰ लब्धायशोभारप्रोद्वहने करोषि कृपया साहाय्यकं यन्मरोः सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचक
म् एकार्थाभिधायकमपि सहार्थबलादुभयस्यावगमकं सा सहोक्तिः सह दिअहणिसाहिं दीहरा
सासदंडा सह मणिवलएहिं बाहधारा गलंति तुह सुहअ विओए तीए उव्विग्गिरीए सहअतणुलआए
दुब्बला जीविदासा श्वासदंडादिगतं दीर्घत्वादि शाब्दं दिवसनिशादिगतं तु सहार्थसामर्थ्यात्प्रतीयते।
१११ विनोक्तिः सा विनान्येन यत्रान्यः सन्न नेतरः क्वचिदशोभनः क्वचिच्छोभनः क्रमेणोदाहरणम्
अरुचिर्निशया विना शशी शशिना सापि विना महत्तमः उभयेन विना मनोभवस्फुरितं नैव चकास्ति
कामिनोः मृगलोचनया विना विचित्रव्यवहारप्रतिभाप्रभाप्रगल्भः अमृतद्युतिसुन्दराशयोऽयं सुहृ।
हृदा तेन विना नरेन्द्रसूनुः परिवृत्तिर्विनिमयो योऽर्थानां स्यात्समासमैः परिवृत्तिरलंकारः उदाहरणा ८॰
म् लतानामेतासामुदितकुसुमानां मरुदयं मतो लास्यं दत्त्वा श्रयति भृशमामोदमसमम् लतास्त्व
ध्वन्यानामहह दृशमादाय सहसा ददत्याधिव्याधिभ्रमिरुदितमोहव्यतिकरम् अत्र प्रथमेऽर्धे समेन

समस्य द्वितीये उन्नमेनन्हतस्य नानाविधप्रहरणोत्कर्षसंप्रहारे स्त्रीरत्नदारुणानिनादवतः प्रहारान् इ
प्रामिवीरविसरे शाववंशेषरे येनिर्विप्रलंभपरिरंभविधिर्वितीर्णः अत्र तस्मिन्नेनोक्तमस्य प्रत्यक्षाइवयद्भा
वाः क्रियंते भूतभाविनः तद्भाविकम् भूताश्च भाविनश्चेति द्वंद्वः भावः कवेरभिप्रायो ऽत्रास्तीति भावि
कम् उदाहरणम् आसीदंजनमत्रेति पश्यामि तव लोचने भाविभूषणसंभारां साक्षात्कुर्वे तवाकृ
तिम् अत्राद्ये ऽर्थे भूतस्य द्वितीये भाविनो दर्शनम् काव्यलिंगं हेतोर्वाक्यपदार्थता वाक्यार्थता यथा
वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा पुरारे नैवाहं क्वचिदपि भवंतं प्रणतवान् नमन्मुक्तः संप्र
त्यतनुरग्रे ऽप्यनतिमानमीश क्षंतव्यं तदिदमपराधद्वयमपि अनेकपदार्थता यथा प्रणयिसखी
सलीलपरिहासरसाधिगतैर्ललितशिरीषपुष्पहननैरपि ताम्यति यत् वपुषि वधाय तत्र तव शस्त्र
मुपक्षिपतः पततु शिरस्यकांडयमदंड इवैष भुजः एकपदार्थता यथा भस्मोद्धूलन भद्रमस्तु भ
वते रुद्राक्षमाले शुभं हा सोपानपरंपरां गिरिसुताकांतालयालंकृतिम् अद्याराधनतोषितेन विभुना
युष्मत्सपर्यासुखालोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे पत्तु अपराधद्वये पूर्वापरजन्म
नोरनमनं मत्वा जपातेषान्नोपद्दिष्टो महामोहे सुखालोकोच्छेदित्वं च यथाक्रमं मन्तोरूपो हि तद्रूपा नः
११३ पर्यायोक्तं विना वाच्यवाचकत्वं व्यच्यते यत् वाच्यवाचकभावविविक्तेनावगमनव्यापारेणाय

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

का०प्र०
४१
५१

प्रतिपादनं तत्पर्यायेण भंग्यन्तरेण कथनात्पर्यायोक्तम् उदाहरणं यं प्रेक्ष्य चिररूढापि निवासप्रीतिरुज्झिता।
मदेनैरावणमुखे मानेन हृदये हरेः अत्रैरावणशक्रौ मदमानमुक्तौ जाताविति व्यंग्यमपि शब्देनोच्यते ते
न यदेवोच्यते तदेव व्यंग्यम् यथा तु व्यंग्यं न तथोच्यते तथा हि गावि शुक्ले चलति दृष्टे गौः शुक्लश्चलश्चेति
विकल्पा यदेव दृष्टं तदेव विकल्पयति न तु यथा दृष्टं तथा अभिन्नासक्तत्वेन दृष्टं भेदसंसर्गाभ्यां विकल्प
यति उदात्तं वस्तुनः संपत् संपत्समृद्धियोगः यथा मुक्ताः केलिविसूत्रहारगलिताः संमार्जनीभिः
हृताः प्रातः प्राङ्गनसीम्नि मन्थरचलद्बालाङ्घ्रिलाक्षारुणाः हाराद्दाडिमबीजशंकितधियः कर्षन्ति केली
शुकाः यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायितम् महतां चोपलक्षणम् उपलक्षणमंगभावः अ
र्थादुपलक्षणीयेऽर्थे उदाहरणम् तदिदमरण्यं यस्मिन्दशरथवचनानुपालनव्यसनी निवसन्बाहु।
सहायश्चकार रक्षःक्षयं रामः न चात्र वीररसः तस्याङ्गत्वात् ११८ तत्सिद्धिहेतावेकस्मिन्यत्रान्यत्तत्करं
भवेत् समुच्चयोऽसौ तस्य प्रस्तुतस्य कार्यस्यैकस्मिन्साधके स्थिते साधकान्तराणि यत्र संभवन्ति स समुच्चयः
उदाहरणम् दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोऽत्युत्सुकं गाढं प्रेम नवं वयोऽतिकठिनाः प्राणाः।
कुलं निर्मलम् स्त्रीत्वं धैर्यविरोधि मन्मथसुहृत्कालः कृतान्तोऽक्षमो नो सख्यश्चतुराः कथं नु विरहः ७१
सोढव्य इत्थं मया अत्र विरहासहत्वं स्मरमार्गणा एव कुर्वन्ति तदुपरि प्रियतमदूरस्थितादयुपात्तम्॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

एषएवचसमुच्चयःसद्योगेऽसद्योगेसदसद्योगेचपर्यवस्यतीतिपृथङ्नलक्ष्यते तथाहि कुलममलिनंभद्रा
मूर्तिर्मतिःश्रुतिशालिनीभुजबलमलंस्फीतालक्ष्मीःप्रभुत्वमखण्डितम् प्रकृतिसुभगाह्येतेभावाअमीभि
रयंजनोव्रजतिनितरांदर्पंराजंस्तएवतवांकुशाः अत्रसतोयोगः उक्तोदाहरणेत्वसतोयोगः शशीदि
वसधूसरोगलितयौवनाकामिनीसरोविगतवारिजंमुखमनक्षरंस्वाकृतेः प्रभुर्धनपरायणःसततदु
र्गतःसज्जनोनृपांगणगतःखलोमनसिसप्तशल्यानिमे अत्रशशिनिधूसरेशल्येवक्तव्येशोभनाशो
भनयोगः सत्वन्योयुगपद्यागुणक्रियाः गुणौचक्रियेचगुणक्रियेच क्रमेणोदाहरणम् विदलितसक
लारिकुलंतवबलमिदमभवदाशुविमलंच प्रखलमुखानिनराधिपमलिनानिचतानिजातानि अय
मेकपदेतयावियोगःप्रिययाचोपगतोऽतिदुःसहोमे नववारिधरोदयादहोभिर्भवितव्यंचनिरातपत्वरम्यैः
कलुषंचतवाहितेष्वकस्मात्सितपंकेरुहसोदरश्रिचक्षुः पतितंचमहीपतीन्द्रतेषांवपुषिप्रस्फुटमापदांक
टाक्षैः धुनोतिचासिंतनुतेचकीर्तिमित्यादेःकृपाणपाणिश्चभवान्रणक्षितौ ससाधुवादाश्चसुराःसुरालयेइ
त्यादेश्चदर्शनात्व्यधिकरणेइति एकस्मिन्देशेइति चनवाच्यम् एकंक्रमेणानेकस्मिन्पर्यायः एकंवस्तुक्र
मेणानेकस्मिन्भवतिक्रियतेवायत्सपर्यायः क्रमेणोदाहरणम् नन्वाश्रयस्थितिरियंतवकालकूट
केनोत्तरोत्तरविशिष्टपदोपदिष्टा प्रागर्णवस्यहृदयेवृषलक्ष्मणोऽथकण्ठेऽधुनावससिवाचिपुनःखलानाम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

का॰प्र॰ ८२

श्रोणीबंधस्त्यजति तनुतां सेवते मध्यभागः पद्भ्यां मुक्तास्तरलगतयः संश्रिता लोचनाभ्याम् धत्ते वक्षः कुच
सचिवतामद्वितीयं तु वक्त्रं तद्गात्राणां गुणविनिमयः कल्पितो यौवनेन बिंबोष्ठ एव रागस्ते तन्वि पूर्वमदृश्य
त अधुना मृगशावाक्षि हृदयेप्येष लक्ष्यते रागस्य वस्तुतो भेदेप्येकतयाध्यवसितत्वादेकत्वमविरुद्धम्।
तं ताण सिरिसहोअररअणाहरणम्मि हिअअमेक्करसं बिंबाहरे पिआणं निवेसिअं कुसुमबाणेन अ
न्यस्ततोन्यथा अनेकमेकस्मिन् क्रमेण भवति क्रियते वा यत्सोन्यः क्रमेणोदाहरणम् मधुरिमरुचि
रैवचः खलानाममृतमहो प्रथमं पृथु व्यनक्ति अथ कथयति मोहहेतुरन्तर्गतमिव हालाहलं विषं तत्
देव तद्गेहं नतभित्ति मंदिरमिदं लब्धावकाशं दिवः सा धेनुर्जरती चरंति करिणामेता घनाभा घटाः स क्षु
द्रो मुसलध्वनिः कलमिदं संगीतकं योषितामाश्चर्यं दिवसैर्द्विजोयमियतीं भूमिं समारोपितः अत्रैकस्यै
व हानोपादानयोरविवक्षितत्वान्न परिवृत्तिः अनुमानं तदुक्तं यत्साध्यसाधनयोर्वचः पक्षधर्मान्वयव्य
तिरेकवत्त्वेन त्रिरूपो हेतुः साधनम् धर्मिण्ययोगव्यवच्छेदो व्यापकस्य साध्यम् यथा यत्रैता लहरी
चलाचलदृशो व्यापारयंति भ्रुवं यत्तत्रैव पतंति संततममी मर्मस्पृशो मार्गणाः तच्चक्रीकृतचापसंचि ८२
तशरप्रेंखत्करः क्रोधनो धावत्यग्रत एव शासनधरः सत्यं सदासां स्मरः साध्यसाधनयोः पौर्वापर्यवि
कल्पेन वैचित्र्यं न किंचिदिति तन्न दर्शितम् ११८ विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः अर्था

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

द्वितीयस्य उदाहरणम् महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः न संहतास्तस्य न भेदवृ-
त्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् यद्यप्यत्र शौर्यस्य दोषत्वाभिधानान्निवारकत्वेन शौर्यस्य स्वीकारः
कृतस्तथाप्येकनिष्ठत्वेन बहूनां विशेषणानामेवमुपन्यासे वैचित्र्यमिति अलंकारमध्ये गणितः एतत्प-
र्यन्तं कृतिः श्रीराजानकमम्मटाचार्यवर्यस्य कृतः श्रीमम्मटाचार्यवर्यैः परिकरावधि निबन्धः पूरितः शेषं
विधायालटसूरिणा अतोऽनन्तरं राजानकालटकेन विरचितम् व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूह-
नम् निगूढमपि वस्तुनो रूपं कथमपि प्रतिभिन्नं केनापि व्यपदेशेन यदपह्नूयते सा व्याजोक्तिः नचैषाप-
ह्नुतिः प्रकृताप्रकृतोभयनिष्ठस्य साम्यस्येहासंभवात् उदाहरणम् शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोप-
गूढोल्लसद्रोमाञ्चादिविसंस्थुलाखिलविधिव्यासङ्गभङ्गाकुलः हा शैत्यं तुहिनाचलस्य करयोरित्यूचिवा-
न्सस्मितं शैलान्तःपुरमातृमण्डलगणैर्दृष्टोऽवताद्वः शिवः अत्र पुलकवेपथू सात्त्विकरूपतया प्रकटितौ शैत्यका-
रणतया प्रकाशितत्वादपलपितस्वरूपौ व्याजोक्तिं प्रयोजयतः ११८ किंचित्पृष्टमपृष्टं च कथितं यत्प्रकल्प्यते
तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृता प्रमाणान्तरावगतमपि वस्तु शब्देन प्रतिपादितं प्रयोजनान्तराभावा-
त्सदृशवस्त्वन्तरव्यवच्छेदाय यत्पर्यवस्यति सा भवेत्परिसंख्या अत्र च कथनं प्रश्नपूर्वकं तदन्यथा च परिदृष्ट-
म् तथोभयत्र व्यपोह्यमानस्य प्रतीयमानता वाच्यत्वं चेति चत्वारोऽस्य भेदाः क्रमेणोदाहरणम् किमासेव्यं पु-

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सांसविधमनवद्यं द्युसरितः किमेकान्ते ध्येयं चरणयुगलं कौस्तुभभृतः किमाराध्यं पुण्यं किमभिलषणीयं च
करुणा यदासक्त्या चेतो निरवधि विमुक्त्यै प्रभवति किं भूषणं सुदृढमत्र यशो न रत्नं किं कार्यमार्यचरितं सुकृ-
का॰प्र॰ तं न दोषाः किं चक्षुरप्रतिहतं धिषणा न नेत्रं जानाति कस्त्वदपरः सदसद्विवेकम् कौटिल्यं कचनिचये कर-
४३ चरणाधरदलेषु रागस्ते काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिका-
43 वि मास्त्रे चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम् यथोत्तरं चेत्पूर्वस्य पूर्वस्यार्थस्य हेतुता तदा कारणमा-
ला स्यात् उत्तरमुत्तरं प्रति यथोत्तरम् उदाहरणम् जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवा-
प्यते गुणाधिके पुंसि जनोऽनुरज्यते जनानुरागप्रभवा हि संपदः हेतुमता सह हेतोरभिधानमभेदतो हे-
तुरिति हेत्वलंकारोऽत्र न लक्षितः आयुर्घृतमित्यादिरूपो ह्येष न भूषणतां कदाचिदर्हति वैचित्र्याभावात्।
अविरलकमलविकासः सकलालिमदः सकोकिलानन्दः रम्योऽयमेति संप्रति लोकोत्कण्ठाकरः कालः इ-
त्यत्र काव्यरूपतां कोमलानुप्रासमहिम्नैव समाम्नासिषुः न हेत्वलंकारकल्पनयेति पूर्वोक्तं काव्यलिंगमे-
व हेतुः क्रियया तु परस्परम् वस्तुनोर्जननेऽन्योन्यम् वस्तुनोरेकक्रियामुखेन परस्परं कारणत्वे सति ४३
अन्योन्यनामालंकारः यथा हंसाणं सरेहिं सिरी सारिज्जइ अह सराणं हंसेहिं अण्णोण्णं विअ एए अ।
प्पाणं णवरं गुरुअन्ति अत्रोभयेषामपि परस्परं जनकता मिथः श्रीसारतासंपादनद्वारेण उत्तरश्रुति

मात्रतः प्रश्नस्योन्नयनं यत्र क्रियते तत्र वा सति असकृद्यदसंभाव्यमुत्तरं स्यात्तदुत्तरम् प्रतिवचनोपलंभादे
व पूर्ववाक्यं यत्र परिकल्प्यते तदेकं तावदुत्तरम् उदाहरणम् वाणिअअ हत्थिदंता कत्तो अम्हाण वग्घकि
त्तीअ जाव लुलिआलअमुही घरम्मि परिसक्कए सुण्हा हस्तिदंतव्याघ्रकृत्तीनामहमर्थी मूल्येन ताः प्र
यच्छेति किं तद्वचनमनेन वाक्येनोन्नीयते न चैतत्काव्यलिंगमुत्तरस्य तादृप्यानुपपत्तेः नहि प्रश्नस्य प्रति व
चनं जनको हेतुः नापीदमनुमानम् एकधर्मिनिष्ठतया साध्यसाधनयोरनिर्देशादित्यलंकारांतरमेवोत्तरं
साधीयः प्रमादनंतरं लोकातिक्रांतगोचरतया यदसंभाव्यरूपं प्रतिवचनं स्यात्तदपरमुत्तरम् अनयोश्च
सकृदुपादाने न चारुताप्रतीतिरित्यसकृदित्युक्तम् उदाहरणम् का विसमा देव्वगई किं लद्धं जं जणो गु
णग्गाही किं सोक्खं सुकलत्तं किं दुक्खं जं खलो लोओ प्रश्नपरिसंख्यायामन्यव्यपोह एव तात्पर्यमिह तु वाच्ये
एव विश्रांतिरित्यनयोर्विवेकः कुतोपि लक्षितः सूक्ष्मोप्यर्थोन्यस्मै प्रकाश्यते धर्मेण केनचिद्यत्र तत्सू
क्ष्मं परिचक्षते कुतोप्याकारादिंगिताद्वा लक्ष्यः सूक्ष्मस्तीक्ष्णमतिसंवेद्यः उदाहरणम् वक्त्रस्यंदिस्वेदबिंदुप्र
बंधैर्दृष्ट्वा भिन्नं कुंकुमं कापि कंठे पुंस्त्वं तन्व्या व्यंजयंती वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख अत्राकृ
तिमालोक्य कयापि वितर्कितं पुरुषायितमसिलतालेखनेन वैदग्ध्यादभिव्यक्तिमुपनीतम् पुंसामेव कृ
पाणस्य योग्यत्वात् यथा वा संकेतकालमनसं विटं ज्ञात्वा विदग्धया हसन्नेत्रार्पिताकूतं लीला

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पद्मं निमीलितम् अत्र जिज्ञासितः संकेतकालः कयाचिदिङ्गितमात्रेण विदितो निशासमयशंसिना कमल
निमीलनेन लीलया प्रतिपादितः उत्तरोत्तरमुत्कर्षो भवेत्सारः परावधिः परः पर्यन्तभागो वधिर्यस्य धारा
धिरोहितत्वेनोत्कर्षस्य विश्रान्तेः उदाहरणम् राज्ये सारं वसुधा वसुन्धरायां पुरं पुरे सौधम् सौधे तल्पं तल्पे
का॰प्र॰ वराङ्गनानङ्गसर्वस्वम् अत्र राज्यापेक्षया भूमेः सारत्वं तदपेक्षया पुरस्येत्यादि परिपाट्या वराङ्गना।
४४ यामुत्कर्षो विश्राम्यति राज्ये सारं च वसुधा वसुधायां महत्पुरम् पुरे सौधं तथा शय्या शय्यायां च वराङ्।
55 गना ११८ ११९ १२० १२१ १२२ भिन्नदेशतयात्यन्तं कार्यकारणभूतयोः युगपद्धर्मयोर्यत्र ख्यातिः सा
स्यादसंगतिः इह यद्देशं कारणं तद्देशमेव कार्यमुत्पद्यमानं दृष्टं यथा धूमादि यत्र तु हेतुफलभूतयो
रपि धर्मयोः केनाप्यतिशयेन नानादेशतया युगपदवभासमानयोः स्वभावोत्पन्नपरस्परसंगति।
त्यागादसंगति उदाहरणम् जस्सेव वणो तस्सेव वेअणा भणइ तं जणो अलिअम् दंतक्खअं क
वोले बहूइ वेअणा सवत्तीणम् एषा च विरोधबाधिनी न विरोधः भिन्नाधारतयैव द्वयोरिह विरोधिता
याः प्रतिभासात् विरोधे तु विरोधत्वमेकाश्रयनिष्ठमेवमनुक्तमपि पर्यवसितमपवादविषयापरिहारे
णोत्सर्गस्य व्यवस्थितेः तथा चैवं निदर्शितम् १२३ समाधिः सुकरं कार्यं कारणान्तरयोगतः साध ४४
नान्तरोपकृतेन कर्त्रा यदक्लेशेन कार्यमारब्धमादीयते स समाधिर्नाम उदाहरणम् मानमस्या नि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

राकर्तुपादयोर्मेघपतिघ्नतः उपकारायदिष्टेदमुदीर्णंहिनगर्जितम् समंयोग्यतयायोगोयदिसंभावितःक्वचित्
इदमनयोःश्लाघ्यमितियोग्यतयासंबंधस्यनियतविषयमध्यवसानंचेत्तदासमम् उदाहरणम् धातुःशि
ल्पातिशायनिकषस्थानमेषाम्मृगाक्षीरूपेदेवोप्ययमनुपमेदत्तपादःस्मरस्य जातंदैवात्सदृशमनयोःसंगतं
यत्तदेतत्शृंगारस्योपनतमधुनाराज्यमेकातपत्रम् यथावा चित्रंचित्रंवतवतमहच्चित्रमेतद्धिचित्रंजा
तेदैवाद्रचितरचनासंविधाताविधाता यन्निंबानांपरिणतफलस्फातिरास्वादनीयायच्चैतस्याःकवलन
कलाकोविदःकाकलोकः १२५ क्वचिद्यदतिवैधर्म्यान्नश्लेषोघटनामियात् कर्तुःक्रियाफलावाप्तिर्नै
वानर्थश्चयद्भवेत् गुणक्रियाभ्यांकार्यस्यकारणस्यगुणक्रिये क्रमेणचविरुद्धेयत्सएषविषमोमतः इ
योरत्यंतविलक्षणतयायदनुपपद्यमानतयैवयोगःप्रतीयते यच्चकिंचिदारभमाणःकर्ताक्रियायाःप्रगु
णान्नकेवलमभीष्टंतत्फलंनलभते यावदप्रार्थितमप्यनर्थंवैषम्यमासादयेत् तथासत्यपिकार्यस्यका
रणरूपानुकारे यत्तयोर्गुणौक्रियेचपरस्परंविरुद्धतांव्रजतःसस्मविपर्ययात्माचतूरूपोविषमः क्रमे
णोदाहरणम् शिरीषादपिमृद्वंगीक्वेयमायतलोचना अयंक्वचकुकूलाग्निकर्कशोमदनानलः सिंहि
कासुतसंत्रस्तःशशःशीतांशुमाश्रितः जग्रसेसाश्रयंतत्रतमन्यःसिंहिकासुतः सद्यःकरस्पर्शमवाप्य
चित्रंरणेयस्यकृपाणलेखा तमालनीलाशरदिंदुशुभ्रंयशस्त्रिलोकाभरणंप्रसूते आनंदममंदमिमं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कुवलयदललोचने ददासि त्वम् विरहवतीये कज्जनितत्तापयति तरां शरीरं मे अत्रानन्ददानं शरीरस्य तापेन वि
रुध्यते एवम् विपुलेन सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगक्षये मदविभ्रमासकलया पपे
का॰प्र॰ पुनः स पुरस्त्वयैकया दृशा इत्यादावपि विषमत्वं यथायोगमवगन्तव्यम् १२५ १२६ महतोर्यन्महीयां
४५ सावाश्रिताश्रययोः क्रमात् आश्रयाश्रयिणौ स्यातां तनुत्वेप्यधिकं तु तत् आश्रितमाधेयम् आश्रयस्तु
२६ तदाधारः तयोर्महतोरपि विषये तदपेक्षया तनुत्वेप्याश्रयाश्रयिणोः प्रस्तुतवस्तुप्रकर्षविवक्षया यथाक्र
मं यदधिकमन्तरं तदुत्प्रेक्षितं तदिदं द्विविधमधिकं नाम क्रमेणोदाहरणम् अहो विशालं भूपाल भुवनत्रि
तयोदरम् माति मातुमशक्योपि यशोराशिर्यदत्र ते युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सवि
कासमासत तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः १२७ प्रतिपक्षमशक्तेन प्रति
कर्तुं तिरस्क्रिया या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते न्यक्कृतिपरमपि विपक्षं साक्षान्निरसितुम
समर्थेन केनापि यत्तमेव प्रतिपक्षमुत्कर्षयितुं तदाश्रितस्य तिरस्करणं तदनीकप्रतिनिधित्वात्प्रत्य
नीकमभिधीयते यथानीकेभियोज्ये तत्प्रतिनिधिभूतमपरं दुर्बलं यत्केनचिदभियुज्यते तथेह ४५
प्रतियोगिनि विजेये तदीयोन्यो विजीयत इत्यर्थः उदाहरणम् त्वं विनिर्जितमनोभवरूपः सा च सुन्द
र भवत्यनुरक्ता पंचभिर्युगपदेव शरैस्तां ताडयत्यनुशयादिव कामः यथा वा यस्य किंचिदपकर्तु

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मदनमः कायनिग्रहगृहीतविग्रहः कांतवक्त्रसदृशाकृतिं कृती राहुरिंदुमधुनापि बाधते इहोत्तरोत्तदीयमानसं
बंधिसंबंधात् १२८ समेन लक्ष्मणावस्तुवस्तुनायन्निगूह्यते निजेनागंतुकेनापितन्मीलितमितिस्मृत
म् सहजमागंतुकं वा किमपि साधारणं यल्लक्षणं तद्वारेण किंचित्केनचिदिह यद्वस्तुस्थितमेव बलीयसा
यातिरोधीयते तन्मीलितमिति द्विधास्मरेति क्रमेणोदाहरणम् अपांगतरलेक्षणो मधुरवक्त्रवर्णावलि
र्णोविलाससभरमंथरागतिरतीवकांतं स्वरम् इति स्फुरितमंगके मृगदृशांस्वतो लीलया तदत्र न मदोद
यः कृतपदोपि संलक्ष्यते अत्र दृक्तरलत्वादिकमंगकस्य लिंगं स्वाभाविकं साधारणं च मदोदयेन चतन्नाये
नस्यदर्शनात् येकंदरासु निवसंति सदा हिमाद्रेस्त्वत्पातशंकितधियो विवशा द्विषस्ते अप्यंगमुत्पुलकमु
द्वहतां सकंपं तेषामहो बत भियां न बुधाप्यभिज्ञाः अत्र तु सामर्थ्यावसितस्य शैत्यस्यागंतुकतयात
त्र्भवयोरपि कंपपुलकयोस्तात्कृत्ये समानता च भयेपि तयोरुपलब्धितत्वात् १२९ स्थाप्यतेपोह्यते वापि
यथापूर्वं परंपरम् विशेषणतया वस्तु यत्र सैकावली द्विधा पूर्वं प्रति यत्रोत्तरस्य वस्तुनो वीप्सया विशेषण
भावेन स्थापनं निषेधो वा संभवति साद्वधैकावलीति भण्यते क्रमेणोदाहरणम् पुराणि यस्यां सवरांग
नानि वरांगना रूपपुरस्कृतांगाः रूपं समुन्मीलितसद्विलासमस्त्रं विलासाकुलमायुधस्य न तज्जलं यन्न
सुचारुपंकजं न पंकजं तद्यदलीनषट्पदम् न षट्पदोसौ न जुगुंज यः कलं न गुंजितं तन्न जहार यन्मनः।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पूर्वत्र पुरारोर्वदनागतानां तासामंग विशेषणानां रवेनत्वं न तस्य विलासास्तेषामप्यस्त्रमित्यनयोः क्रमेण विशेषणं विधी
यते उत्तरत्र निषेध्येष्वेवमेव योज्यम् ॥ १२ ॥ यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः स्मरणम् । यः पदार्थः ।
का॰ प्र॰ केनचिदाकारेण नियतो यथाकथंचिदनुभूतस्तत्कालान्तरे स्मृतिप्रबोधायायोग्ये नितत्समाने वस्तुनि दृष्टे सति
४६ यत्तथैव स्मर्यते तत्तद्वत् स्मरणम् उदाहरणम् निम्ननाभिकुहरेषु यदंभः प्लावितं चलदृशां लहरीभिः ।
46 तद्भवैः कुहरुतैः सुरनार्यः स्मारिताः सुरतकंठरुतानाम् यथा वा करजस्रग्गन्धिस्रजमोऽस्याथ्यगाम्तहूवि
निवेशिन्याहरतडुस्समं भविश्रयं चमूरुणास्तारामहूकरुस्मरोम्मचमम् भ्रान्तिमानन्यसंवित्तत्तुल्यदर्शने
तदित्यन्यदप्राकरणिकं निर्दिश्यते तेन सामर्थ्यात् प्राकरणिकमाक्षिप्यते तस्य तथाविधस्य दृष्टौ स
त्यां यदप्राकरणिकतया संवेदनं स भ्रान्तिमान् न चैष रूपकं प्रथमातिशयोक्तिर्वा तत्र वस्तुनो भ्रमस्या
भावात् इह चार्थान्तरमिन संज्ञायाः प्रहतेस्तस्यैव प्रतिपन्नत्वात् उदाहरणम् कपाले मार्जा
रः पय इति करान् लेढि शशिनस्तरुच्छिद्रप्रोतान् बिसमिति करी संकलयति रतान्ते तल्पस्थान् हरति वनिताप्य
शुकमिति प्रभामत्तश्चन्द्रो जगदिदमहो विप्लवयति ॥ १३ ॥ आक्षेप उपमानस्य प्रतीपमुपमेयता तस्यैव या ।
दि वा कल्प्या तिरस्कारनिबंधनम् अस्य धुरं वहतः उपमेयमेव वोढुं प्रौढमिति किमर्थः केन यदुपमानमा । ४६
क्षिप्यते तदेकम् यदपि च तस्यैवोपमानतया प्रसिद्धस्योपमानान्तरविवक्षया नादरार्थमुपमेयभावः क ४६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ल्पितेन तदुपमेयस्यैवोपमानं प्रति प्रतिकूलवर्तित्वादुभयरूपं प्रतीपम् । क्रमेणोदाहरणम् । लावण्यौकसि सप्रता
पगरिमण्यग्रेसरे त्यागिनां देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा । इन्दुः किं घटितः किमेष विहितः पू
षा किमुत्पादितश्चिंतारत्नमहो मुधैव किममी सृष्टाः कुलक्ष्माभृतः ॥ एषु हि दावसंदर्शिकसं दारुणस्य गास्य ।
वर्णनम् । तज्जम्महेरणाकिसोअरिचंदोनवमिज्जइ जणेण ॥ अत्र मुखेनोपमेयमानस्य शशिनः स्वल्पतर
गुणत्वादुपमेयाधिक्यतिष्णत्वाव अणिज्जमिति वचनीयमभिव्यंग्यया तिरस्कारः । क्वचित्तु निष्पन्नैवोपमि
तिक्रियाऽनादरनिबंधनम् । यथा गर्वमसंवाह्यमिमं लोचनयुगलेन किं वहसि भद्रे । संतीदृशानि दिशि दि
शि सरःसु ननु नीलनलिनानि ॥ इत्योपमेयीकरणमेवोत्पलानामनादरः । अनयैव नीत्या यद्सामान्यगुणयो
गान्नोपमानभावमनुभूतपूर्वं तस्य तत्कल्पनायामपि भवति प्रतीपमिति प्रत्येतव्यम् । यथा अहमेव गुरुः सु
दारुणानामिति हालाहल मा तात मास्म दृप्यः । ननु संति भवादृशानि भूयो भुवनेस्मिन्वचनानि दुर्जनानाम् ॥
अत्र हालाहलस्योपमानत्वमसंभाव्यमेवोपनिबद्धम् । १३२ प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया । ऐका
त्म्यं बध्यते योगात्तत्सामान्यमिति स्मृतम् ॥ अतादृशमपि तादृशतया विवक्ष्यते यदप्रस्तुतपदार्थेन संपृक्तम
परित्यक्तनिजगुणमेव तदेकात्मतया निबध्यते तत्समानगुणसंबंधात्सामान्यम् । उदाहरणम् । मलय
जरसविलिप्ततनवो नवहारलताविभूषिताः सिततरदंतपत्रकृतवक्त्ररुचो रुचिरामलांशुकाः शशभृतिवि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

का॰प्र॰ ८०

57

तत्तथाप्ययवलयति धरामविभाव्यतां गताः प्रियवसतिमनुषयांति हृष्टमेव निर्वलम्भियोभिसारिकाः अत्र प्रस्तुततदन्य
योरन्यूनातिरिक्ततया निबद्धं धवलत्वमेकात्मताहेतुः अतएव पृथग्भावेन न तयोरुपलक्षणम् यथा वा वेत्रत्वचा
तुल्यरुचां वधूनां कर्णाग्रतो गंडतलागतानि भृंगाः सहेलं यदि नापतिष्यन्कोवेदयिष्यन्नवचंपकानि अत्र नि
मित्तान्तरजनितापि नानात्वप्रतीतिः प्रथमप्रतिपन्नमभेदं न व्युदसितुमुत्सहते प्रतीतत्वात्तस्य प्रतीतेश्च बाधा
योगात् १३३ विना प्रसिद्धमाधारमाधेयस्य व्यवस्थितिः एकात्मा युगपद्वृत्तिरेकस्यानेकगोचरा अन्यत्प्रकुर्व
तः कार्यमशक्यस्यान्यवस्तुनः तथैव करणं चेति विशेषस्त्रिविधः स्मृतः प्रसिद्धाधारपरिहारेण यदाधेयस्य वि
शिष्टा स्थितिरभिधीयते स प्रथमो विशेषः उदाहरणम् दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषा
म् रमयंति जगंति गिरः कथमिव कवयो न ते वंद्याः एकमपि वस्तु यदेकेनैव स्वभावेन युगपदनेकत्र वर्तते ।
स द्वितीयः उदाहरणम् सावसइतुज्झहिअए सच्चिअ अच्छीसु साअव अदणेसु अम्हारिसाण सुंद
र ओवासो कत्थि पावाणं यदपि च किंचिद्रभसेनारभमाणस्तेनैव यत्नेनाशक्यमपि कार्यान्तरमारभते सोऽप्य
परो विशेषः उदाहरणम् स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजतानवद्यविद्यम् विधिना ससृजे नवो
मनोभूर्भुवि सत्यं सविता बृहस्पतिश्च यथा वा गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलावि। ८०
धौ करुणाविमुखेन मृत्युना हरता त्वां वत किं न मे हृतम् सर्वत्र चैवंविधे विषयेऽतिशयोक्तिरेव प्राणत्वेना

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वतिष्ठते नाविनाप्रायेणालंकारत्वायोगात् अत एवोक्तम् सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते यत्नोस्यां
कविना कार्यः कोऽलंकारोऽनया विनेति १२५ समुत्सृज्य गुणं योगादत्युज्ज्वलगुणस्य यत् वस्तु तद्गुणतामे
ति भण्यते स तु तद्गुणः वस्तु तिरस्कृतनिजरूपं केनापि समीपगतेन प्रगुणतया स्वगुणसंपदोपरक्तं तत्प्र
तिभासमेव यत्समासादयति स तद्गुणः तस्याप्रकृतस्य गुणोऽत्रास्तीति उदाहरणम् विभिन्नवर्णा गरुडाग्र
जेन सूर्यस्य रथ्याः परितः स्फुरन्त्या रत्नैः पुनर्यत्र रुचं रुचा स्वामानिन्यिरे वंशकरीरनीलैः अत्र रवितुर
गापेक्षया गरुडाग्रजस्य तदपेक्षया च हरिन्मणीनां प्रगुणवर्णता १२६ तद्रूपाननुहारश्चेदस्य तत्स्यादत
द्गुणः यदि तन्नदीयवर्णसंभवंत्यामपि योग्यतायामिदं न तद्गुणानुहरणीयात्तदा भवेदतद्गुणो नाम उदा
हरणम् धवलोसि जहवि सुंदर तहवि तुए मज्झ रंजिअं हिअअं रामभरिए वि हिअए सुहअ णिहित्तो
णरत्तोसि अत्रातिरक्तेनापि मनसा संयुक्तो न रक्ततामुपगत इत्यतद्गुणः किंच तदित्यप्रकृतमस्येति च प्रकृ
तमत्र निर्दिश्यते तेन यदप्रकृतस्य रूपं प्रकृतेन कुतोऽपि निमित्तान्नानुविधीयते सोऽतद्गुण इत्यपि प्रतिपत्तव्यम्
यथा गांगमंबु सितमंबु यामुनं कज्जलाभमुभयत्र मज्जतः राजहंस तव सैव शुभ्रता चीयते न च न चाप
चीयते यद्यथा साधितं केनाप्युपायेन तदन्यथा तथैव यद्विधीयेत स व्याघात इति स्मृतः येनोपायेन यदे
केनोपकल्पितं तस्मादेव न जिगीषुतया तदुपायकमेव यदन्यथाकरणं स साधितवस्तु व्याहतिहेतुत्वात्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

व्याख्यातः उदाहरणम् दृशा दग्धं मनसिजं जीवयंति दृशैव याः विरूपाक्षस्य जयिनीस्ताः स्तवे वामलोचनाः ॥
सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः एतेषां समनंतरमेवोक्तस्वरूपाणामलंकाराणां यथासंभवमन्यो
न्यनिरपेक्षतया यदेकत्र शब्दभाग एवार्थविषय एवोभयत्रापि वावस्थानं सैकार्थसमवायस्वभावा संसृष्टिः
 तत्र शब्दालंकारसंसृष्टिर्यथा वदनसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया चलितया विदधे क
 लमेखलाकलकलोऽलकलोलदृशान्यया अर्थालंकारसंसृष्टिस्तु लिंपतीव तमोंगानि वर्षतीवांज
 नं नभः असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता पूर्वत्र परनिरपेक्षो यमकानुप्रासौ संसृष्टिं प्रयोजयतः उ
त्तरत्र तथाविधे उपमोत्प्रेक्षे शब्दार्थालंकारसंसृष्टिस्तु सोणत्थ गामे जो एअं सहमहन्तलाअण्णम्
तरुणाणं हिअअलूडिं परिसक्कन्तिं णिवारेऽ अत्रानुप्रासो रूपकं चान्योन्यनिरपेक्षे संसर्गश्रुतयोरेक
त्र वाक्ये दृष्टसंनिवासमवेतत्वात् १३९ १३८ अविश्रांतिजुषामात्मन्यंगांगित्वं तु संकरः एते एव तु यत्रात्म
न्यनासादितस्वतंत्रभावाः परस्परमनुग्राह्यानुग्राहकतां दधति स एषां संकीर्यमाणस्वरूपत्वात् संकरः उदाह
रणम् आत्ते सीमन्तरत्ने मरकतिनि हृते हेमताटंकपत्रे लुप्तायां मेखलायां झटिति मणितुलाकोटियुग्मे
गृहीते शोणं बिंबोष्ठकांत्या त्वदरिमृगदृशामित्वरीणामरण्ये राजन् गुंजाफलानां स्रज इति शबराने
वहारं हरंति अत्र तद्गुणमपेक्ष्य भ्रांतिमता प्रादुर्भूतं तदाश्रयेण च तद्गुणः सचेतसां प्रभंतच्चमत्कृतिनिमि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

न्नमित्यनयोरंगांगिभावः यथा वा जटाभाभिर्भाभिः करधृतकलंकाक्षवलयो वियोगिव्यापत्तेरिव कलित
वैराग्यविशदः परिप्रेंखत्तारापरिकरकपालांकिततले शशी भस्मापांडुः पितृवन इव व्योम्नि चरति उपमारू
पकमुत्प्रेक्षाश्लेषश्चेति चत्वारोऽत्र पूर्ववदंगांगितया प्रतीयन्ते कलंक एवाक्षवलयमिति रूपकपरिग्रहे क
रधृतत्वमेव साधकप्रमाणतां प्रतिपद्यते तस्य हि रूपकत्वे तिरोहितकलंकरूपमक्षवलयमेव मुख्यतया
अवगम्यते तस्यैव च करग्रहणयोग्यतायां सार्वत्रिकी प्रसिद्धिः श्लेषछायया तु कलंकस्य करधारणमस
देव प्रत्यासत्त्योपचर्य योज्यते शशांकेन कलंकस्य मूर्त्यैवोद्वहनात् कलंकोऽक्षवलयमिति उपमायां
कलंकस्योत्कटतया प्रतिपत्तिर्न चास्य करधृतत्वं तत्त्वतोऽस्तीति मुख्यैवोपचार एव शरणं स्यात् एवं रूपश्च सं
करः शब्दालंकारयोरपि परिदृश्यते यथा राजति तटीयमभिहतदानवरासातिपातिसारावनदा गजता
च यस्यामविरतदानवरासातिपातिसारावनदा अत्र यमकमनुलोमः प्रतिलोमश्च चित्रभेदः पादद्वयगते
च परस्परापेक्षे एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः द्वयोर्बहूनां वालंकाराणामेकत्र समावेशेऽपि वि
रोधान्न यत्र युगपदवस्थानसंभवो न चैकतरस्य परिग्रहे साधकं तदितरस्य वा परिहारे बाधकमस्ति येनै
कतर एव सपरिगृह्येत स एव निश्चयाभावरूपो द्वितीयः संकरः समुच्चयेन संकरस्यैवाक्षेपात् उदा
हरणम् जह गंभीरो जह रअणणिब्भरो जह अ णिम्मलच्छाओ ता कि विहिणा सो सरसबाणिओ जल

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

निह्नीस्यकंठो अत्रसमुद्रे प्रस्तुते विशेषणसाम्यादप्रस्तुतार्थप्रतीतेः किमेषोसमासोक्तिः किमुत्रैवप्रस्तुत
स्तुत्वेनकस्यापिनत्वमगुणातयाप्रस्तुतस्यप्रतिपत्तेरियमप्रस्तुतप्रशंसेतिसंदेहः यथावा नयनानंद
दायीदोर्बिंबमेतत्प्रसीदति अधुनापिनिरुद्धाशमपिशीर्णमिदंतमः अत्रचकिंकामस्योद्दीपकः कालो
का॰प्र॰ वर्ततइतिभंग्यंतरेणाभिधानात्पर्यायोक्तम् उतदवनसंडबिंबतयाध्यवसानादतिशयोक्तिः किंवैतदिति
५९ वक्तीतिदिग्यत्तद्रूपारोपवशाद्रूपकम् अथैतयोः समुच्चयविवक्षायांदीपकम् अथवानल्पयोगिता किं
मुपदोषसमयेविशेषणसाम्यादानंतस्यावगतेःसमासोक्तिः अहोस्विन्मुखेनैर्मल्यप्रस्तावादप्रस्तुतप्रशं
५९ - सा इतिबहूनांसंदेहादयमेवसंकरः यत्रतुन्यायदोषयोरन्यतरस्यावतारस्तत्रैकनिश्चयान्नसंशयः ।
न्यायश्चसाधकत्वमनुकूलतादोषश्चबाधकत्वंप्रतिकूलता तत्रसौभाग्यंवितनोतिवक्त्रशशिनोज्योत्स्ने
वहासद्युतिरित्यत्रमुखस्यतयावगम्यमानाहसितद्युतिर्वक्त्रेएवानुकूल्यंभजतेइत्युपमायाःसाधनम् शा
शितित्वनतथाप्रतिकूलेतिनरूपकंप्रतितस्याबाधकता वक्त्रेंदौतवसत्ययंयदपरःशीतांशुरभ्युद्गतइत्य
त्रापरत्वमिंदोननुगुणंनतुवक्त्रस्यप्रतिकूलमितिरूपकस्यसाधकतांप्रतिपद्यतेनतूपमायाबा ५९
धकताम् राजन्नारायणंलक्ष्मीस्त्वामालिंगतिनिर्भरमित्यत्रपुनरालिंगनमुपमांतिरस्यति असदृशो
प्रतिप्रेयसीप्रयुक्तस्यालिंगनस्यासंभवात् पादांबुजंभवतुमेविजयायमंजुमंजीरशिंजितमनोहर

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रंभिकाया इत्यत्र च मञ्जीरशिंजितमंबुजे प्रतिकूलमसंभवादिति रूपकस्य बाधकम् । न तु पादानुकूल
मित्युपमायाः साधकमभिधीयते उपमादेर्विध्नुपमर्दिना बाधकस्य तदपेक्षयोत्कटत्वेन प्रतिपत्तेः एवमन्य
त्रापि स्वधीभिः प्रतीह्यम् १२९ स्फुटमेकत्र विषये शब्दार्थालंकृतिद्वयम् व्यवस्थितं च अभिन्ने च पदे ।
स्पष्टतया यदुभावपि शब्दार्थालंकारौ व्यवस्थां समासादयतः सोऽप्यपरः संकरः क्रमेणोदाहरणम् स्पष्टो
ल्लसत्किरणकेसरसूर्यबिंबविस्तीर्णकर्णिकमथो दिवसारविंदम् श्लिष्टाष्टदिग्दलकलापमुखावतार
बद्धान्धकारमधुपावलि संचुकोच अत्रैकपदानुप्रविष्टौ रूपकानुप्रासौ सो णत्थि एत्थ गामे जो एअं महमहन्त
लावण्णं तरुणाणं हिअअलूडिं परिसक्कन्तिं णिवारेइ एवं त्रेकपदानुप्रविष्टौ रूपकानुप्रासावुत्तरत्र तु शब्दार्थालंकारयो
र्थयोस्तावेव विपर्ययस्थित्या विभागेन व्यवस्थितौ तेनासौ चतुरूपः प्रकीर्तितः तदयमनुग्राह्यानुग्राहकत
यासंदेहेन च विशिष्टतया हि रूपत्वादेकानेकपदाभिधेयतया व्यवस्थितत्वेन हि भेदत्वाच्च न तु प्रकारान्तरैरेव संक
रोऽव्याहतः प्रकारान्तरेण तु न शक्यो व्याकर्तुं आनन्त्यात्तद्भेदभेदानामिति प्रतिपादितः शब्दार्थोभयगतत्वे
नैत्रविध्यञ्चैषालंकाराः ननु पुनरेष प्रतिनियमो यदेतेषां नु लोपिकाव्यशोभातिशायहेतुत्वे कश्चिदलंका
रः शब्दस्य कश्चिदर्थस्य कश्चिच्चोभयस्येति चेत् उक्तमत्र तथा यथा काव्ये दोषगुणालंकाराणां शब्दार्थोभय
गतत्वेन व्यवस्थायामन्वयव्यतिरेकावेव प्रभवतो निमित्तान्तरस्याभावात् ततश्च यो लंकारो यदीयौ भावाभा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वावन्तद्विधत्वे सततदलंकारो व्यवस्थाप्यते इति एवं च यथा पुनरुक्तवदाभासः परस्परितं रूपकं चोभयोर्भावाभा
वान्वयविधायित्वेनोभयालंकारौ तथाहि शब्दहेतुकार्थान्तरन्यासप्रभृतयोपि द्रष्टव्याः अर्थस्य तत्रैव वैचित्र्यमुत्क
का॰प्र॰ टतयावभासते इति ते वाच्यालंकृतिमध्ये वस्तुस्थितिमनपेक्ष्यैव लक्षिताः योलंकारो यदाश्रितः सतदलंका
५९ र इत्यपि कल्पनायामन्वयव्यतिरेकावेवाश्रयितव्यौ तदाश्रयमंतरेणाविशिष्टस्याश्रयाश्रयिभावस्याभावा
दित्यलंकाराणां यथोक्तनिमित्त एव परस्परं व्यतिरेको ज्यायान् ॥ ५९ ॥ एषां दोषा यथायोगं संभवंतोपि केन
५० च उक्तेषु तः पतंतीति न पृथक् प्रतिपादिताः तथाहि अनुप्रासस्य प्रसिद्ध्यभावो वैफल्यं वृत्तिविरोध इति
ये त्रयो दोषाः ते प्रसिद्धविरुद्धतामपुष्टार्थत्वं प्रतिकूलवर्णतां च यथाक्रमं नातिक्रामंतः। क्रमेणो
दाहरणम् चक्री चक्रारपंक्तिं हरिरपि च हरीन् धूर्जटिर्धूर्ध्वजान्तान् अक्षं नक्षत्रनाथोऽरुणमपि वरुणः कू
वराग्रं कुबेरः रंहः संघः सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य स्तौति प्रीतिप्रसन्नोन्वहमहिमरुचेः सो
वतात् स्यंदनो वः अत्र कर्तृकर्मप्रतिनियमेन स्तुतिरनुप्रासानुरोधेनैव प्रतिपादिता नपुनरितिहासादि
षु तथा प्रतीतेति प्रसिद्धविरोधः भण्णातकण्णि रमणामंदिरमानंदस्यंदिसुंदरेंदुमुखि यदि सल्लीलोल्लापिनि
गच्छसि तत्किं त्वदीयं मे अनणुरणन्मणिमेखलमविरतशिंजानमंजुमंजीरम् परिसरणमरुणा ५९
चरणे रणरणकमकारणं कुरुते अत्र वाच्यस्य विवेच्यमानेन किंचिदपि चारुत्वं प्रतीयते इत्यपुष्टा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

र्थितेवानुप्रासस्यैवफलम् अकुंठोत्कंठयापूर्णमाकंठंकलकंठिमाम् कंबुकंठ्याःक्षणंकंठेकुरुकंठार्ति।
मुद्धर संगारेषुरुषोवर्णाडंबरःसर्वोक्तयानीत्याविरुध्यतेइति परुषानुप्रासप्रतिकूलवर्णानाहतिविरोधः
यमकस्यपादत्रयभागगतत्वेनयमनमप्रयुक्तत्वदोषः यथा भुजंगमस्येवमणिःसदंभाग्राहावकीर्णावनदी
सदंभाः दुरंतंतोनिर्णायतेपिजंतोःकर्षतिचेतःप्रसभंखेसदंभाः उपमायामुपमानस्यजातिप्रमाणगते।
न्यूनत्वमधिकतावानाहशीमनुचितार्थत्वेदोषः यथाप्रयेतन्यूनताधिकत्वेयथाक्रमंहीनपदत्वमधिक
पदत्वंचानव्यभिचरतः क्रमेणोदाहरणं चंडालैरिवयुष्माभिःसाहसंपरमंकृतम् वह्निस्फुलिंगइवभानुरयंचका।
कास्ति अयंपद्मासनासीनःचक्रवाकोविराजते युगादौभगवान्ब्रह्माविनिर्मित्सुरिवप्रजाः पातालमिवना।
भिस्तेस्तनौवितिपरोपमौ वेणीदंडःपुनरयंकालिंदीपात्रसंनिभः अत्रचंडालादिभिरुपमानैःप्रस्तुतार्थ
स्यधिमेवकदर्थितइत्यनुचितार्थता सविनिलाल्लितौमोंज्याहत्साजिनपटंवहन् व्यराजन्नीलजीमूत
भागाश्लिष्टइवांशुमान् अत्रोपमानस्यमौंजीस्थानीयतडिल्लक्षणोधर्मःकेनापिपदेननप्रतिपादितइ
तिहीनपदत्वं सपीतवासाःप्रगृहीतशार्ङ्गोमनोज्ञभीमंवपुरापकृष्णः शातह्रदेंद्रायुधवान्निशायांसंसृ
ज्यमानःशशिनेवमेघः अत्रोपमेयस्यशंखादेरनिर्देशेशशिनोग्रहणमतिरिच्यतेइत्यधिकपदत्वम्
लिंगवचनभेदोप्युपमानोपमेययोःसाधारणंचेद्धर्ममन्यरूपंकुर्यान्नदेकतरस्यैवतद्धर्मसमन्वयद्वया

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वृत्तेः सविशेषणस्यैव तस्योपमानत्वमुपमेयत्वं वा प्रतीयमानेन धर्मेण प्रतीयते इति प्रक्रान्तस्यार्थस्य स्फुटमनि-
र्वाहादस्य भग्नप्रक्रमरूपत्वम् यथा चिन्तारत्नमिव च्युतोऽसि करतो धिङ्मन्दभाग्यस्य मे सन्त्येवाभिहितादे
का॰ प्र॰ वंशुद्धः कुलवधूरिव यत्र तु नानात्वेऽपि लिङ्गवचनयोः सामान्याभिधायि पदं स्वरूपभेदं नापद्यते न तत्रैतद्दू-
५१ षणावतारः उभयत्राप्यस्यानुगमस्य सम्भवात् यथा गुणैरनर्घैः प्रथितो रत्नैरिव महार्णवः तद्व-
51 दौसदृशोऽन्याभिः स्त्रीभिर्मधुरताभृतः दधते स्म परां शोभां तदीया विभ्रमा इवेति कालपुरुषविध्यादिभेदे-
ऽपि न तथा प्रतीतिरस्खलितरूपतया विश्रान्तिमासादयतीत्यसावपि भग्नप्रक्रमतयैव व्याप्तः यथा अति-
थिं नाम काकुत्स्थात्पुत्रमाप कुमुद्वती पश्चिमाद्यामिनीयामात्प्रसादमिव चेतना अत्र चेतना प्रसादमाप्नो-
तीति पुनर्वाप्नोतीति कालभेदः अत्यग्रमज्जनविशेषविविक्तमूर्तिः कौसुम्भरागरुचिरस्फुरदंशुकान्ता विभा-
जसे मकरकेतनमर्चयन्ती बालप्रवालविटपिप्रभवा लतेव अत्र लता विभ्राजते न तु विभ्राजसे इति संबो-
ध्यमानविषयतया व्यत्यासात्पुरुषभेदः गङ्गेव प्रवहतु ते सदैव कीर्तिरित्यादौ गङ्गा प्रवहति न तु प्रवहतु इति
त्यप्रवृत्तप्रवर्तनात्मनो विधेर्वैजातीयकस्य चान्यस्यार्थस्योपमानगतस्यासंभवाद्विध्यादिभेदः ननु सा- ५१
मानसमनुच्चरिते प्रतीयमाने वा धर्मान्तरमुपादाय पर्यवसितायामुपमायामुपमेयस्य प्रकृतधर्माभिसं-
यानात्कथं न कालादिभेदोऽस्तीति यत्राप्युपात्तेनैव सामान्यधर्मेणोपमावगम्यते यथा युधिष्ठिर इवा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ऽयं सत्यवादीति तत्र युधिष्ठिर इव सत्यवादी सत्यं वदतीति प्रतिपत्स्यामहे सत्यवादी सत्यं वदतीति च न पौनरुक्त्यमा
शंकनीयम् दैवोऽयं युध्यतीतिवत् युधिष्ठिरस्य सत्यवादेन सत्यवाग्ययमित्यर्थावगमात् सत्यमेवैतत् किन्त
स्यैतेषु प्रयोगेषु समर्थनमिदं न तत्सर्वथा निरवद्यम् प्रस्तुतवस्तुप्रतीतिविघातादिति तच्चेतस एवात्र प्रमाण
म् अस्मात्सम्भाव्यासंभवावस्तूपमयामनुचितार्थतायामेव पर्यवसानः यथा अस्यामिकाव्यशशिनं वितता
र्थरश्मिमत्र काव्यस्य द्योतिनार्थानां च रश्मिभिः सार्धमंकुत्रापि न प्रतीतमित्यनुचितार्थत्वम् निष्पन्नवा
स्यादिव तस्य दीप्ताः शरायनेर्मंडलमध्यभाजः जाज्वल्यमाना इव वारियारादिनार्धभाजः परिवेशिनो
कान् अत्रापि ज्वलतोऽयां बुधावाः सूर्यमंडलान्निष्पतंत्यो न संभवंतीत्युपनिबुध्यमानोऽर्थोनौचित्यमेव पुष्णाति
उत्प्रेक्षायामपि संभावने ध्रुवेवादय एव शब्दा व्यक्तमेवोत्प्रेक्षन्ते न यथाशब्दोऽपि केवलस्यास्य साधर्म्यमेव प्र
तिपादयितुं पर्याप्तत्वात्तस्य चास्यामविवक्षितत्वादिति तत्राशक्तिरस्यावाचकत्वं दोषः यथा उदयेयोदीर्हि
कागर्भीत्यकुलेमेचकोत्पलम् नारीलोचनचातुर्यशंकासंकुचितं यथा उत्प्रेक्षितमपि नातिकेरणा
रूपेणापरिवर्जितत्वान्निरूपाख्यप्रख्येन तत्समर्थनाय यदर्थान्तरन्यासस्योपादानं तदालेख्यमिव गगनतले
तनमसमीचीनमिति निर्विषयत्वमेतस्यानुचितार्थत्वमेव दोषः यथा दिवाकराद्रक्षति यो गुहासु लीनं
दिवाभीतमिवांधकारम् क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव अत्राचेतनस्य तमसो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दिवाकराज्ञामप्यवनसंभवति कृतएव तत्प्रयोजितमद्रिणापरित्राणम्‌ संभाविते न तत्त्वेन प्रतिभासमाना
स्यास्य न कदाचिदुपपत्तिरवतरतीति व्यर्थ एव तत्समर्थनायां यत्नः साधारणविशेषणवशादेव समासो
का॰प्र॰ क्तिरनुक्तमप्युपमानविशेषमेव प्रकटयतीति तस्यात्र पुनरुपादाने प्रयोजनाभावादनुपादेयतायत्नट
५२ पुष्टार्थत्वं पुनरुक्तभावो दोषः यथा स्पृशति तिग्मरुचोकक्रमः कैरैर्दयितयेव विजृंभिततापया अत
५२ नुमानपरिगृह्य यास्थिते रुचिरयाचिरयायिदिनश्रिया अत्र तिग्मरुचेः काकुभांच यथा समृश्श विशेष।
णावधानव्यक्तिविशेषपरिग्रहेणाचनायकतायाव्यक्तिस्तथा ग्रीष्मदिवसश्रियोपि प्रतिनायकात्वेनभवि
ष्यतीति किं दयितयेति स्वशब्दोपादानेन श्लेषोपमायास्तस्तविषयोयत्रोपमानस्योपादानमंतरेण साया
रणोपि विशेषणोपुनतथा प्रतीतिः यथा स्वयं च पल्लवाताम्रभास्वत्करविराजिनी प्रभातसंध्येवास्वा
पफललुब्धेहितप्रदेति अत्र प्रस्तुतप्रशंसायामप्युपमेयमनयैव नीत्या प्रतीतम्‌ न पुनः कदर्थनात्र यो
गेनेयम्‌ यथा आहूतेषु विहंगमेषु मशको नायान्पुरोवार्यते मध्येवारिधिवावसंस्तृणमणिर्धत्ते मणी
नांरुचम्‌ खद्योतोपि न कंपते प्रचलितुं मध्येपि तेजस्विनां धिक्सामान्यमचेतनं प्रभुमिवानामृष्टतत्त्वांत
रम्‌ अत्राचेतनः प्रभोरप्रस्तुतविशिष्टसामान्यद्वारेणाभिव्यक्तेरयुक्तमेव पुनः कथनम्‌ नदेतेलेकार ५२
दोषा यथा संभविनोन्येप्येवंजातीयकाः पूर्वोक्तेष्वेव दोषजात्यानभीविनानत्पृथक्प्रतिपादनमर्हंतीति।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

संपूर्णमिदंकाव्यलक्षणम् ॥ १ ॥ ॥ छ॥ इतिश्रीकाव्यप्रकाशेर्थालंकारनिर्णयोनामदशमउल्ला
सः ॥१॥ इत्येषमार्गोविदुषांविभिन्नोप्यभिन्नरूपःप्रतिभासतेयत् नतद्विचित्रंयदमुत्रसम्यग्विनिर्मि
का॰प्र॰ तासंघटनैवहेतुः ॥१॥ समाप्तोयंकाव्यप्रकाशः॥ छ॥ शुभमस्तुसर्वजगताम् ॥छ॥ छ॥ छ॥
५३
संवत् १८ ८९॥

53

५३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative